KUMER TANTRAM

THE CARE INFANTS AND DISEASES OF CHILDREN

Kaviraj Jamini Bhushan Ray Kaviratna,

M.A., M.B., M.R.A.S.

Ex-President, All-India Ayurvedic Conference and Ayurveda Vidyapitha

(All-India Board of Ayurvedic Education)

Fellow of the Calcutta University, Etc.

Published by the

AYURVEDIC MEDICAL COLLEGE

29, Fariapukur Street,

CALCUTTA.

1920.

Price Rs. 2

Copyright Reserved.

कुमार-तन्त्रम्।

निखिलभारतवर्षीय-सप्तम-वैद्य-सम्मेलनाधिनायक-
कलिकाता-विश्वविद्यालयान्यतमसदस्या-
ष्टाङ्गायुर्व्वेद-विद्यालयाध्यक्ष-

कविराज-श्रीयामिनीभूषण-राय-कविरत्न-

एम. ए., एम्. वि., एम्. आर्. ए. एस्.

इत्यनेन कृतम्

वनौषधिदर्पणकार-राजवैद्य-

श्रीविरजाचरण-गुप्त-कविभूषणेन

सम्पादितञ्च

कलिकाता २६ संख्याक फड़ियापुकुरवर्त्मस्थिता-
ष्टाङ्गायुर्व्वेद-विद्यालयतः

कविराज श्रीसुरेन्द्रकुमार काव्यतीर्थेन

प्रकाशितम्।

Calcutta:
Printer—B. P. HAZRA.
SANSKRIT PRESS,
31, Nando Kumar Chowdhury 2nd Lane.

उत्सर्गपत्रम्

अशेष-नृपगुणगौरवमण्डित-विश्वविश्रुतकीर्त्तिं-महाराजाधिराज

श्रील श्रीयुक्त-अनारेवल् स्यार्

विजयचांद [redacted]

के, सि, एस्, आइ; के, सि, आइ, इ; आइ, ओ, एम्;

महोदयस्य सुपवित्र-करकमलेषु।

जीर्णायुर्व्वेदकल्पद्रुम इह नृमणे वर्द्धमानः समन्तात्
त्वत्कारुण्याम्बुसिक्तः प्रदिशतु भविनां वर्द्धमानेश भव्यम्।
इत्याशां वर्द्धमानां तव करकमले मत्कृतिं साहसेन
दातुं मां प्रेरयन्तीं सफलय करुणास्निग्धदृष्ट्याऽत्र देव॥

Jewel among men, the Hindu Science of Medicine—although it is like the celestial tree which grants every desired boon,—is now old and withering. Sprinkled with the waters of your kindness and flourishing once again, may it dispense weal to all creatures of this world! This growing hope urges me to venture to place this work of mine, however unworthily, in your lotus-like hands. May it be blessed with fruition by a glance of your eyes softened by kindness.

सूची ।

विषयः	पृष्ठाङ्कः
(अ)	
अजगल्ली	... २१
अतिसार चिकित्सा	.. ४१
अतिक्षुत् चिकित्सा	.. ५९
अन्नादः	... १३
अनामक चिकित्सा	... ५२
अन्धपूतना प्रतिषेधः	... ५९
अपस्तन्यस्य प्रीतिकरं भोज्यं	.. १४
अपामार्गक्षार तैलं	... ६८
अर्थ्यकाजुष्ट लक्षणं	... ३२
अन्धपूतनाजुष्टस्यलक्षणं	... २९
अष्टमङ्गल घृतम्	... ५५
(१) अहिपूतनः	... २०
(२) अहिपूतन चिकित्सा	... ४८
(३) अहिपूतिगन्धिका चिकित्सा	५२
(आ)	
आनाह चिकित्सा	... ४७
आमातीसार चिकित्सा	... ४१
(उ)	
उन्नतनाभिचिकित्सा	... ५०
उल्वकः	... २३
उल्वकचिकित्सा	... ४९

विषयः	पृष्ठाङ्कः
(क)	
कटपूतनाजुष्ट लक्षणं	... ३१
कटपूतनाप्रतिषेधः	... ६३
कर्णपूर्व चिकित्सा	... ६७
कासकाजुष्ट लक्षणम्	.. ३२
कासकाप्रतिषेधः	... ६४
कासज्वरचिकित्सा	.. ४४
कासश्वास चिकित्सा	.. ४३
कुकूणकः	... २०
कुकूणकचिकित्सा	... ४७
कुमारकल्याणघृतम्	... ५६
कुमारक्रीड़ाभूमिः	.. १२
कुमारक्रीड़नकं	... १२
कुमारागारः	... ४
कुमारानुशासनम्	... १३
कुमारचर्य्या	... ११
कुमारधारकगुणाः	... १५
कुमारविद्याशिक्षा	.. १२
कुमारस्य जन्म प्रभृति पथ्यम्	४
कुमारस्य स्नान परिच्छदादिकम्	४
कुष्ठाद्यं तैलं	.. ६९
क्षयस्य चिकित्सा	... ५०

विषयः	पृष्ठाङ्कः
(ग)	
गुदपाकचिकित्सा	... ४६
गुरुस्तन्यस्य चिकित्सा	... २७
ग्रहजुष्टस्यासाध्यलक्षणं	... २०
ग्रहणी चिकित्सा	... ४२
ग्रहानां व्याधिकरणत्वे प्रमाणम्	२५
ग्रहोपसृष्टलक्षणम्	... २५
(च)	
चिराद्दन्तोत्पत्तिः	... १४
(ज)	
ज्वरातिसारचिकित्सा	... १४
(त)	
तालुकण्टकः	... १६
तालुकण्टकस्य चिकित्सा	... ४७
तृष्णाचिकित्सा	... ५१
(द)	
दन्तपतनकालः	... १५
दन्तपवनभक्षणं	... १३
दन्तशब्दः	... २३
दन्तोद्भेदकालः	... १४
दन्तोद्भेद गदान्तकः	... ७०
दन्तोद्भेदजनकयोगाः	... २८
दन्तोद्भेदकालस्य दुःखहेतुता	१४
दन्तोत्पत्तिपूर्व्वरूपम्	... १२
दन्तोद्भेदमूलकरोगाः	... ३२
दन्तोद्भेदभवरोगचिकित्सा	२६६
दुर्गन्धस्य स्तन्यस्य चिकित्सा	३
दुग्धवमनचिकित्सा	... ४४
(ध)	
धात्रीगुणाः	... ५
धात्रीकर्म्म	... ७
धात्रीपरिवर्त्तनम्	... ७
धात्रीकर्म्मणोऽसम्यगनुष्ठाने दोषः	७
(न)	
नन्दाजुष्टलक्षणम्	... ३१
नन्दाप्रतिषेधः	.. ६२
नवायसलौहम्	... ६६
नयनामयचिकित्सा	... ४६
नाभिपाकचिकित्सा	... ४५
नाभिशोथचिकित्सा	... ४५
नाड़ीच्छेदनं	... २
नाड़ीच्छेदनदोषजारोगाः	... ३
निर्ऋता जुष्टलक्षणम्	... ३२
निर्ऋता प्रतिषेधः	... ६३
नैगमेयग्रहार्त्तस्य लक्षणं	... २७
नैगमेयचिकित्सा	.. ६१

विषयः	पृष्ठाङ्कः
(प)	
पक्षाघातजः	... २२
प्राणप्रत्यायनोपायः	... १
पाण्डुरोग चिकित्सा	... ५१
पारिगर्भिकचिकित्सा	... ४९
पारिगर्भिकः	... २१
पारसीकादि चूर्णं	... ६७
पिच्छिलस्य स्तन्यस्य चिकित्सा	२७
पित्तज्वरचिकित्सा	... २९
पित्तदुष्टं स्तन्यं	... १७
पित्तग्रहाभिजुष्टस्य लक्षणं	... २८
पिलिपिच्छिकाजुष्टलक्षणं	... ३२
पिलिपिच्छिकाचिकित्सा	... ६४
पित्तग्रहप्रतिषेधः	... ६२
पूतनाग्रहाभिजुष्टस्य लक्षणं	२८
पूतनाजुष्टलक्षणं	... ३१
पूतनाप्रतिषेधः	... ५९
पूतना प्रतिषेधः	... ६३
प्रवाहिका चिकित्सा	... ४१
प्रकारान्तरेणौषधोपयोगः	... ३४
(फ)	
फेनिलस्य स्तन्यस्य शोधनं	... ३५
(ब)	
बातज्वरचिकित्सा	... २९
बातदुष्टं स्तन्यं	... १७
बातश्लेष्मचिकित्सा	... ४७
बातादिदुष्टस्तन्यलक्षणं	... ७
बातातपादिभ्यो बालरक्षा	... १०
बालानां भेषज दानपानविधिः	३२
बालानां भेषजमात्रा	... ३४
बालानां रोगज्ञानोपायः	... २४
बालनिष्ठरोगः	... ९१
बालक रसः	... ६४
बाले परिजनस्य करणीयम्	... ९
बित्रासनार्थं राक्षसानां नाम ग्रहणं न कार्यं	१०
बिनामविजृम्भिकाचिकित्सा	५१
बिनाम बिजृम्भिके	... २२
बिवर्णस्य स्तन्यस्य चिकित्सा	२६
व्यापन्न स्तन्यस्य रोगहेतुत्वं	... १५
(भ)	
भीतिजनकस्तन्यत्यागोपायः	... १५
(म)	
महतां व्याधीनां बालेष्वतिदेशः	१९
महापद्म रोगः	... २०
मातृस्तन्यप्रवृत्तिकालः	... ५
मुखमण्डिका प्रतिषेधः	... ६०
मुखमण्डिकाजुष्टलक्षणं	... २१

विषयः	पृष्ठाङ्कः
मुखमण्डिकार्त्तस्य लक्षणं	... २६
मूत्राघातचिकित्सा	... ४७
मृत्तिकाजातरोगचिकित्सा	५३
मुखपाकचिकित्सा	... ५५
मुखस्रावचिकित्सा	... ५०
मद्यलक्षणस्यानिष्टकारित्वम्	११
(र)	
रक्तप्रवाहिकाचिकित्सा	... ४२
रुक्षस्य स्तन्यस्य चिकित्सा	... ३५
रेवतीजुष्टलक्षणं	... ३०
रेवतीप्रतिषेधः	... ५८
रोदनत्रास-चिकित्सा	... ४६
(ल)	
लाक्षादि तैलं	.. ५५
(व)	
वक्रनीग्रहाभिजुष्टस्य लक्षणं	२८
वक्रनीजुष्टचिकित्सा	... ५७
वक्रनिकाजुष्टलक्षणं	... ३२
वक्रनिप्रतिषेधः	... ६३
वल्लावटी	... ६५
वल्वक तैलं	... ६६
विल्वरितैलं	... ७०

विषयः	पृष्ठाङ्कः
विप्लुतैलं	... ६८
विशोररोचकादिः	... २२
शीतपूतनाजुष्टस्य लक्षणं	... २८
शीतपूतनाप्रतिषेधः	... ६०
शुद्धस्तन्यपानस्यौचित्यम्	... ७
शुष्ककासचिकित्सा	... ४४
शुष्करेवतीचिकित्सा	... ६२
शुष्करेवतीजुष्टलक्षणं	... ३२
शुष्करेवतीप्रतिषेधः	... ६३
श्लेष्मज्वरचिकित्सा	... ४०
श्लेष्मदुष्टं स्तन्यं	.. १८
श्वयथुचिकित्सा	... ४७
श्वयथुप्रतिषेधः	.. ६१
श्वयथुर्त्तस्य लक्षणं	... २७
(स)	
सञ्जातदन्तस्य स्तन्यत्यागः	... १४
सर्व्वज्वरचिकित्सा	... ४०
स्निग्धस्य स्तन्यस्य चिकित्सा	३७
सिध्मपामादिचिकित्सा	... ५०
सुनन्दाजुष्टलक्षणम्	... ३१
सुनन्दाप्रतिषेधः	.. ६२
सूतिकाजुष्टलक्षणम्	... ३२
सूतिकाप्रतिषेधः	... ६३
स्कन्दग्रहजुष्टचिकित्सा	... ५६

विषयः	पृष्ठाङ्कः
स्कन्दापस्मारजुष्टचिकित्सा	... ५७
स्कन्दार्त्तस्य लक्षणं	... २६
स्कन्दापस्मारार्त्तस्य लक्षणं	... २६
स्तन्यजननानि	... ८
स्तन्यपानविरतिचिकित्सा	... ४६
स्तन्यपानं यासामयुक्तम्	... ६
स्तन्यपरीक्षा	... ६
स्तन्याभावे यत् पेयम्	.. ६
स्तन्यनाशहेतुः	... ७
स्तन्यदोषानां निदानादि	... १६
स्तन्यदोषफलम्	... ६
स्तन्यदोषचिकित्सा	.. १५
(क्ष)	
क्षतविसर्पादिचिकित्सा	... ५०
क्षीरपः	... १२
क्षीरास्वादः	... १२
क्षीरालसकः	.. २१
क्षीरालसकचिकित्सा	... २८

कुमारतन्त्रम् ।

अथ बालोपचरणीयो नाम प्रथमोऽध्यायः ।

जातमात्रमेव कुमारः स्वतन्त्रवृत्तिर्भवति । (१) स चायं करवसनपवनसंसर्गं क्रकचस्पर्शमिव मन्यमानो रोदित्युच्चैः । अतिसम्बाधयोनिपुटावपीड़ितप्राणत्वाद् यद्यसौ रुजानुरूपं क्रोशितुमप्यसमर्थो लीयमानसंज्ञोऽचेष्ट इव स्यात् तदा तस्य प्राणप्रत्यायनाय कार्य्यान्येतानि कर्म्माणि भवन्ति । तद्यथा

शङ्करं ज्ञानदं नत्वा वीक्ष्य तन्त्राणि यत्नतः ।
क्रियते बालबोधार्थमायुर्व्वेदप्रकाशिका ।

(१) जातमात्रमिति । जन्मनः पूर्व्वन्तु गर्भः परतन्त्रवृत्तिरासीत् साक्षात् पानाशनिःश्वासोच्छ्वासाप्रवृत्तेः । गर्भस्य परतन्त्रत्वप्रतिपादको ग्रन्थो यथा—"मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाड़ी प्रतिबद्धा । सास्य मातु राहारररसवीर्य्य मभिवहति । तेनोपश्लेहेनास्याभिवृद्धि र्भवति" । अपिच—"निःश्वासोच्छ्वाससङ्क्षोभस्वप्नान् गर्भोऽधिगच्छति । मातुर्निःश्वसितोच्छ्वाससङ्क्षोभस्वप्नसम्भवान्" । जातस्य तु साक्षात् निःश्वासोच्छ्वासस्तन्यप्रवृत्तेः स्वतन्त्रवृत्तित्वम् । सचेति । क्रकचस्पर्शत्वे हेतुर्गर्भविशेषण माह चाद्य मिति । उद्वेगजनकः करादिसम्पर्कोऽपि क्रोशने हेतुः । अतिसम्बाधेति यस्तु सुखं प्रसूयते स्वस्थश्च प्रायशः स जातमात्रमेवोच्चै रोदिति, तस्यानेनैव क्रोशनेन तत स्वस्थत्वं च विज्ञायते । यस्तु महता कष्टेन प्रसूयते सैव सूतिक्लेशात् कदापि क्रोशितुमसमर्थो लीयमानसंज्ञ इव लक्ष्यते । तस्यैव पुनर्जीवनाय यानि कर्म्माणि कार्य्याणि क्रमेण तान्याह सुपरिलिखितयेति । गर्भस्थस्य कफवेष्टितकण्ठत्वात् कदापि कुमारो जातमात्रं रोदितु मसमर्थो निरुच्छ्वास इव दृश्यते ; अतस्तदपसारणाय

सुपरिलिखितनखया सुप्रक्षालितोपधानया कार्पासपिचुव-
गुण्ठितया दक्षिणप्रदेशिन्या जिह्वौष्ठकण्ठमनुसुखं प्रमृज्यात् ।
कर्णयोर्मूलेऽश्मनोः सङ्घट्टनम् । शीतोदकेनोष्णोदकेन वा
सुखेन परिषेकः । यदि वा अचेष्ट एव स्यात् ततः

जिह्वाकण्ठप्रमार्ज्जने मादौ निर्दिशति सुपरिलिखितयेति। कर्णयोरिति। अयन्तावत् द्वीतीयोपायः प्राणप्रत्यागमनाय । अश्मनोः सङ्घट्टनमित्युपलक्षणं तेनोद्वेगजनकाना मितरेषामपि श्रुतिकठोरशब्दानां ग्रहणम् । न च जात-मात्रस्य कुमारस्य शब्दग्रहणशक्ते रसद्भावाच्छ्रुति-कटोर-शब्दानां चैतन्यजनकत्वेऽकिञ्चित्करत्वं शङ्कनीयम् श्रोत्रगतास्तु शब्दवहास्तु नाड़ीषु तेषां प्रभावदर्शनात्। उपायान्तरमाह शीतोदकेनेति । अत्रैवार्थे वा शब्दो ज्ञेयः, तेन शीतेनोष्णेनैवोदकेन क्रमेण द्वित्रिवारं परिषेकस्तस्मिन् आकण्ठं निमज्जनं वा कार्य्यम्। निमज्जनक्रमस्तु भिषक् वामहस्तेन कुमारस्यांसदेशं दक्षिणेन च पादद्वयं धृत्वा स्त्रिप्रतया निमज्जयिष्यति कुमारम् शीतवारिण्युष्ण-वारिणि च क्रमेण । सुखेनेति । नात्यतिशीतेन नात्युष्णेनेत्यर्थः । उक्तेनैव विधिना द्वित्रिनिमज्जनेनैव प्रायशः कुमारस्य प्राणाः प्रत्यायान्तीति दृश्यते । चकारस्तत्र विकल्पार्थे वा शब्दं स्नानार्थे च परिषेकशब्दं गृहीत्वा ग्रीष्मकाले शीतोदकेन शीतकालेतूष्णोदकेन कुमारस्य स्नानं मेवाह । नायं स्नानविधिः किन्तु प्राणप्रत्यागमनोपाय एव ; तद्विधस्य स्नानस्य संक्लेशविहतानां प्राणाणां प्रत्यागमने योग्यता-भावात् वक्ष्यमानेन प्रत्यागतप्राणं स्नानोदकग्रहणाभ्यासप्रपादयेदिति वाक्येन सह विरोधाच्च। विफलीभूते तस्मिन् तृतीयोपायमाह यदिवेति । बीजनप्रकर्षाय धूपग्रहणम्। मार्हवद्वीतनाय घाताशङ्कापरी-हाराय च धूपस्य लवणकपालिकामयत्व मुपदिष्टम्। अभिनिश्वसनीयुरिति पदेन बीजनकारिणो बहुत्वं सूचयति। निःश्वासोच्छ्वासप्रवर्त्तनाय

कृष्णकपोलिकाशूर्पेण चैनमभिनिष्पुनीयुर्यावत् प्राणानां प्रत्यागमनम्।

नाड़ीच्छेदन मुपदिशति—

प्रत्यागतप्राणस्य च प्रकृतिभूतस्य नाभिबन्धनात् (२) प्रभृत्यष्टाङ्गुल मायम्य मूलाच्चतुरङ्गुलस्योर्द्धं छेदनावकाशस्य द्वयो रन्तरयोरभिज्ञानं कृत्वा तीक्ष्णेण शस्त्रेण छेदयेत्।[13] असम्यक् कल्पने हि नाड्या आयामव्यायामहुण्डिका-पिण्डलिका विनाभिका-जृम्भिकाबाधेभ्यो भयम्। ✓

फुप्फुसयोर्बायुप्रेरणमेव बीजनप्रयोजनम्। यावत् कुमारस्य हृत्स्पन्दनं वर्त्तते तावत् प्राणप्रत्यायनार्थं यतितव्यमेव।

(२) नाड़ीकल्पनमुपदिशति **नाभिबन्धनादिति**। आयम्य आकृष्य, नाभिबन्धनात् अमरां प्रति रक्तप्रवहनार्थं नाड्या दोहनं कृत्वेत्यर्थः। **द्वयोरन्तरयोरिति** स्थिरीकृतछेदनावकाशस्योर्द्धमधश्च। **अभिज्ञानं कृत्वेति** चौमसूत्रेण दृढ़कार्पाससूत्रेण वा ऊर्द्धमेकमधस्तैकं बन्धनं दत्वा द्वयोर्बन्धनयोर्मध्ये तीक्ष्णेण शस्त्रेण छेदनं कर्त्तव्यम्। इयमेव नाड्याः सम्यक् कल्पना। नास्यत्रकापि स्रावाशङ्का अतः स्रावपरीहारार्थं नाड्यपबद्धस्य सूत्रस्य कुमारस्य कण्ठे बन्धनोपदेशो निरर्थक एवेति नोक्तः। असम्यक् छेदने ये व्याधयोभवन्ति तानाह **आयामेत्यादि**। आयामो दैर्घ्यं, व्यायामो विस्तारः, ताभ्यामुहुण्डिका आयामव्यायामोहुण्डिका दीर्घपीनत्वयुतेत्यर्थः; पिण्डलिका परिमण्डलयुता; विनाभिका अन्त्राच्छूना मध्यनिम्ना; विजृम्भिका तु हुहुर्हुहुर्दृष्टिमतीति चक्रपाणिः। एते वातामयविशेषाः प्रायो दृश्यन्ते कुमारस्य सूतिकागारावस्थानकाले।

कुमारस्य स्नानपरिच्छदादिकमाह—

ततः स्नानोदकग्रहणाभ्यामुपपादयेत् । (१) अनन्तरं शुचौ प्रशस्ते रम्येऽतमस्के निवाते प्रवातैकदेशे दृढे निर्मत्कुणपिपीलिकाखुमशके कुमारागारे कुमारं क्षौमपरिवृतं क्षौमवस्त्रास्तृतायां शय्यायां शाययेत् । आगारस्याभ्यन्तरतोऽग्निर्नित्यं स्यात् । अनुरक्तदृष्टजनयुक्तञ्च तद् वेश्म कार्य्यं । गुग्गुल्वादिभिर्धूमं कुर्वीत । मूर्द्ध्नि चास्याहरहस्तैलपिचुमवतारयेत् । शय्या-स्तरण-प्रावरणानि कुमारस्य मृदुलघुशुचिसुगन्धीनि स्युः । स्वेदमलजन्तुमन्ति मूत्रपुरीषोपसृष्टानि च वर्ज्यानि स्युः । असति सम्भवेऽन्येषां तान्येव सुप्रक्षालितोपधूपितानि सुशुष्कशुद्धान्युपयोगं गच्छेयुः । अभ्यङ्गोद्वर्त्तनं स्नानं नेत्रयो रक्षनं बालस्य जन्मप्रभृति पथ्यम् ।

---

(१) नाड़ीच्छेदनादनन्तरं कुमारस्य स्नानादिकमुपदिशति ततदिति । उदकग्रहणं मलमार्गशौचम् । स्नानन्तु शीतकाले उष्णोदकेन शीघ्रकाले तु शीतोदकेन । यस्तु स्वस्य एव प्रसूयते तस्यैव स्नानमुच्यते । प्रत्यागतप्राणकुमारपक्षेतु मलमार्गशौचसङ्कारितया स्नानमिदं विशेषेण गात्रमलापसारणार्थमेव ज्ञेयम् । कुमारागारं विधिनष्टि शुचाविति । शुद्धशुष्काणीति धौतान्यपि यदा मलादिरागेणापि रञ्जितानि भवन्ति शुष्काणि च तदैवोपयोज्यानि । सधौतं स्नार्द्रमपि स्यात् तथा मातृरागमलादिभावितं धौतमप्यशुद्धं स्यात् तस्मादुक्तं शुद्धशुष्काणीति । उद्वर्त्तनम्—पिष्टेन चूर्णीकृतेन वा द्रव्येण गात्रघर्षणम् ।

मातस्तन्यप्रवृत्तावधिमाह—

धमनीनां हृदिस्थानां विवृतत्वादनन्तरम् ।
चतूरात्रात्त्रिरात्राद् वा स्त्रीणां स्तन्यं प्रवर्त्तते ।

आस्तन्यपर्याप्तं धात्र्याःस्तन्यपानं क्षीरबालत्वात् शस्तं

मृतो धात्रीगुणानाह—

अथास्य समानवर्णा, मध्यमवयाः, (४) शुचिरलोलुपा, निभृता, नातुरा, जीवत्-वत्सा, वत्सला, देशजातीया, अविरूपा, अव्यङ्गा, बहुक्षीरा, स्तन्यसम्पदुपेता, शुक्लाम्बराचारा दीर्घह्रस्वादिदेहदोषरहिता लम्बोर्द्वचुचुकातिहीनपीनस्तनदोषरहिता युक्तचुचुका धात्री स्यात् । अस्या एव स्तन्यं पिबेत् ।

भवन्तिचात्र—

पीताय यदि बालस्य विदध्यादुपमातरम् ।
सुविचार्य्य गुणान् दोषान् कुर्य्याद्धात्रीं तदेदृशीम् ।

(४) मध्यमवयसा इत्यनेन बालाद्वृद्धे निरस्यति, असम्पूर्णाङ्गक्षीणधातुत्वात् तयोः । निभृतेति विनीता, देशजातीया समानदेशजा, अविरूपा अविकृतावयवा । अव्यङ्गा अहीनाङ्गी । स्तन्यसम्पदुपेतेति—स्तन्यसम्पत्त प्रकृतगन्धरसस्पर्शसुदकपात्रेऽवदुह्यमानसुदकं व्येति प्रकृतिभूतत्वात् तत् पुष्टिकरमारोग्यकरञ्चेति तदुपपन्नमित्यर्थः । लम्बोर्द्वेति—स्तनसम्पदुपपन्नमित्यर्थः—नात्यूर्द्धौ नातिलम्बावनतिह्रस्वावनतिपीनौ युक्तपिप्पलकौ सुखप्रापनौ चेति स्तनसम्पत् । न च सर्व्वत्र धात्रीनियोजनमावश्यकं । मातरि मृतायां रुग्णायां स्तन्यव्यापदि वा तस्यावश्यकतास्ति । अथवा तत्र तत्रापि गव्यमाजं वा दुग्धं दीयते कुमारस्य पानाय वर्त्तिकाद्वारेण ।

सवर्णां मध्यवयसां सच्छीलां मुदितां सदा
शुद्धदुग्धां बहुक्षीरां सवत्सा मतिवत्सलाम् ।
स्वाधीनामल्पसन्तुष्टां कुलीनां सज्जनात्मजाम् ।
कैतवेन परित्यक्तां निजपुत्रदृशं शिशौ ।

स्तनदोषफलमाह—

पीनोऽतिकन्धराभङ्गं कुर्यादूर्ध्वाञ्च मूर्द्धगः ।
उच्छ्वासरोधाल्लम्बोऽति स्तनो जीवितसंशयम् ।

यासां स्तन्यपानमयुक्तं ता आह—

शोकाकुला क्षुधार्त्ता च श्रान्ता व्याधिमती सदा ।
गर्भिणी ज्वरिणी पथ्यवर्ज्जिताऽजीर्णभोजिनी ।
अत्युच्चा नितरां नीचा स्थूलातीव भृशं कृशा ।
आसक्ता क्षुद्रकार्य्येषु दुःखार्त्ता चञ्चलापि च ।
एतासां स्तन्यपानेन शिशुर्भवति सामयः ।

स्तन्यपरीक्षामाह—

अथास्याः स्तन्यमप्सु परीक्षेत । तच्चेत् शीतलमम्लं, तनु, शङ्खावभासमप्सु न्यस्तमेकीभावं गच्छति, अफेनिलं, अतन्तुमत्, नोत्प्लवते न सीदति यदुदकेन सहैकतां गच्छति वा तच्छुद्धमिति विद्यात् । तेन कुमारस्यारोग्यं शरीरोपचयो बलवृद्धिश्च भवति ।

वातादिदुष्टस्तन्यलक्षणमाह—

कषायं सलिलप्लावि स्तन्यं मारुतदूषितम्।
पित्तादम्लञ्च कटुकं राज्योऽभासि तु पीतिकाः।
तन्तुमत् कफदुष्टन्तु तोये मज्जति पिच्छिलम्।

शुद्धस्तन्यपानस्यौचित्यं सहेतुकमाह—

स्तन्यदोषाद् गदास्तस्य यथोक्तं तत् पिवेदतः।

धात्रीकर्म्माह—

अथ धात्री स्नातानुलिप्ता (५) नित्यमहतवासाः सुमनाः स्तनं प्राग्दक्षिणं धौत मोषत् परिस्रुतं पाययेत्।

धात्रीपरिवर्त्तनस्यानिष्टकारित्वं दर्शयति—

नानास्तन्यस्य हि असात्म्यत्वात् नानाव्याधिव्यापदो भवन्ति।

धात्रीकर्म्मणोऽसम्यगनुष्ठाने दोषमाह—

अपरिस्रुते चातिस्तन्यपूर्णस्तनपानेन अस्नेहनात् कास-श्वासज्वरच्छर्दीनां सम्भवः। अधौते स्वेदमलादिदोषः।

स्तन्यनाशहेतुमाह—

रुक्षान्नपानकर्शनक्रोधशोककामादिभिःस्तन्यनाशः—

---

(५) अनुलिप्ता चन्दनागुरुप्रभृतिभिः। नानास्तन्यस्येति। धात्र्या अनियतत्वे नानास्तन्यपानेन कुमारस्य व्याधि र्जायते। अष्टाङ्ग संग्रहे तु चरकादिवत् एकैव धात्री उक्ता, हृदये तु "स्तन्य-धात्र्यावुभे कार्य्ये" इति यत्धात्रीद्वयमुक्तं तदनियतधात्र्या बहुनिष्ट-कारितां मनुभवद्भिरस्माभि र्नादृियते।

भवति चात्र—

अवात्सल्याद् भयाच्छोकात् क्रोधादत्यपतर्पणात् ।
स्त्रीणां स्तन्यं भवेत् स्वल्पं गर्भान्तरविधारणात् ।

स्तन्यजननानि मद्यानि सौधुवजर्ज्यानि, आनूपमांसानि, द्रवाः स्वाद्वम्ललवणप्रायाश्चाहाराः, क्षीरिण्यश्चौषधयः, क्षीरपान मनायासः सौमनस्यञ्च ।

भवन्ति चात्र—

शालिषष्टिकगोधूमान् मांसक्षुद्रझषानपि । (६)
कालशाकमलाबूञ्च नारिकेलं कशेरुकम् ।

स्तन्यजनान्यपि द्रव्याण्याह—

शृङ्गाटकं वरीञ्चापि विदारीकन्दमेव च ।
लसूनं दुग्धसिद्धं स्त्री सेवेत सुमना भवेत् ।
कलमस्य तण्डुलानां कल्कं या क्षीरपेषितम् पिबति ।
सा भवति प्रचुरतर-क्षीरभरेणैव तुङ्गकुचयुगला ।

---

(६) क्षुद्रझषान् क्षुद्रमत्स्यान् । कालशाकं कुलत्थशाकं । शृङ्गाटकं पाणिफलमिति बङ्गीयभाषानाम । वरीमिति शतावरी वानरीबीजंवा । शतावरीपक्षे "मोरट्वा" कल्पनया, वानरीबीज-पक्षेतु गोधूमचूर्ण-शर्कराप्लुतदुग्धैरुत्कारिकां कृत्वा भोक्तव्यम् । विदारीकन्दस्य रसं तच्चूर्णम्वा पयसा पेयम् । कलमलक्षणं—कलमः कलिविख्यातो जायते स दृढदुत्तुदे । काम्बोरदेश एवोक्तो महातण्डुलसंज्ञकः ।

अनन्याः प्राक् स्तन्यावतरणात् तदभावे वा धात्र्याद्यालाभे यत् श्रेयं तदाह—

क्षीरसाम्यतया क्षीरमाजं गव्यमथापि वा। (७)
दद्यादास्तन्यपर्य्याप्ते बालानां बीक्ष्य मात्रया।

बाले परिजनस्य करणीयं निर्दिशन्नाह—

बालं पुनर्गात्रसुखं गृह्णीयात्। नचैनं तर्जयेत्। सहसा न प्रतिबोधयेत् वित्रासभयात्। नह्यस्य वित्रासनं

---

(७) क्षीरसाम्यतयेति। आद्यौ कुमार-प्राशन-पद्धतिः स्पष्टमुच्यते। जन्मनः प्रभृति दिनत्रिचतुर्णां मातुः स्तन्याभावस्तस्मात् प्रथमे अह्नि त्रिकालं अनन्तामिश्रिते मधुसर्पिषी शिशुं प्राशयेत्। द्वितीये तृतीये च दिवसे लक्षणासिद्धं घृतं तीनेव कालान् भोजयेत्। चतुर्थे दिवसे द्विकालं प्रातर्मध्याह्नलक्षणं मधुसर्पिः प्राशयेत्। तदनन्तरं चतुर्थदिवसस्य तृतीय-कालमारभ्य पञ्चमादिदिवसेषु यथेष्टं स्तन्यमतस्ततः परं मातुरेव स्तन्यं पिबेत् इति सुश्रुतवाग्भटानुमतः कुमारप्राशनविधिः। चरकस्तु जन्मदिवस एव मधुसर्पिः प्राशनानन्तरं स्तनपान मुपदिशति। तथाच तदुपन्यासः—"ततोऽनन्तरं जातकर्म्म कुमारस्य कार्य्यम्। तद्यथा—मधुसर्पिषी मन्त्रोपमन्त्रिते यथाम्नायं प्रथमं प्राशितुं दद्यात्। स्तनमत ऊर्द्धमेतेनैव विधिना।" अधुना कुमारस्याहारविधिभेदकारणं वक्ष्यामः। जन्मनः प्रभृति त्रिचतुर्दिनं क्षीरसाम्यः कुमारो मधुसर्पिषी प्राश्य कथं जीवेदिति सर्व्वत्र नाशङ्कनीयम्। यतः प्रसवतो दिनमेकं हित्वा बहूनां कुमाराणां स्तन्यग्रहणसामर्थ्यं दुग्धपानप्रवृत्तिर्व्वा न दृश्यतेऽधनापि। यत्र कुमाराणां स्तन्यपाने पिपासा नानुभूयते तत्रैव सुश्रुतवाग्भटोक्त-मधुसर्पिः-प्राशनविधिरावश्यकोदयात् पालनीयः। यत्र तु स्तन्यग्रहणसामर्थ्यं

साधु । तस्मात् तस्मिन् कदन्नभुञ्जानेवान्यत्र विधेयताम-गच्छति राक्षसपिशाचपूतनाद्यानां नामान्वाख्ययता कुमारस्य बित्रासनार्थं नामग्रहणं न कार्य्यं स्यात् । सहसा नापहरे-दुत्क्षिपेद्वा वेगरोधभयाद् वातादिविघातभयाच्च । नोप-वेशयेत् कौक्षेयभयात् । (८) नित्यञ्चैनमनुवर्त्तेत प्रियग्रतेरजि-घांसुः ।

उक्तप्रकारानुकूलने फलमाह

एवमनभिहतमनास्त्वभिवर्द्धते बित्यमुदग्रसत्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति ।

बातातपबिद्युत्प्रभापादपलताशून्यागारनिम्नस्थानगृह-च्छायादिभ्योदुर्ग्रहोपसर्गतश्च बालं रक्षेत् ।

दुग्धपानप्रवृत्तिर्बाक्षि तत्र सघृतपिप्पलीपानानन्तरं सत्यपि स्तन्यस्वल्पत्वे धरकानुमतं मातुरेव स्तन्यं पिबतु कुमारः । न च तदा मातृस्तन्यस्य घनत्वादिकं बिभाव्य प्राग्वनाग्रङ्का करणीया । तदा सदधर्म्मत्वात् कुमारस्य गर्भभलपातने तत् प्रकृतमतोदेयमिति धरकमतसम्बादिनो दृढबैद्याः । सत्या-मपि दुग्धवाहायां कुमारस्य यदा मातृस्तन्याभावः स्मृता वा माता गुणसम्पन्नाया धात्र्याश्चाभावो वा तत्र किं कार्यमित्याशङ्क्याह क्षीरसात्मतयेति ।

(८) नोपवेशयेदिति पञ्चममासात् पूर्व्वं नोपवेशयेत् । पूर्णे तु पञ्चमे मासे साग्र्यं सावलम्बं उपवेशनं प्रत्यहं विधीयते । तथाच वृद्धवाग्भटः— "पञ्चमेमासे पूर्णेऽह्नि धरण्यामुपवेशयेत् । प्रत्यहञ्च ततः परं साग्र्यं सावलम्बञ्च कक्षादीन् गर्हयेदनु" । अनुवर्त्तेत अनुकूलयेत् । प्रियग्रतेः तच्छन्दानुवर्त्तनप्रार्थितप्रदानादिभिः । अजिघांसुः न प्रहारकारी कुमार-भार इति शेषः । उक्तप्रकारानुकूलने फलमाह—एव मित्यादि ।

भवन्ति चात्र—

बाल मङ्के सुखं दद्यात् नचैनं तर्जयेत् क्वचित्।
सहसा बोधयेन्नैव नायोग्यमुपवेशयेत्।
नाक्रुश्य स्थापयेत् क्रोड़े न क्षिप्रं शयने क्षिपेत्।
रोदयेन्न क्वचित् कार्य्ये विधि मावश्यकं विना। (९)
तच्चित्त मनुवर्त्तेत तं सदैवानुमोदयेत्।
वर्षं खर्वसते बाल्यं कुमारस्य न दर्शयेत्।
दीपमातपमग्निञ्च रूपमन्यच्च भासुरम्।
बातातपतड़िद्दृष्टिधूमानलजलादितः।
निम्नोच्चस्थानतश्चापि रक्षेद् बालं प्रयत्नतः।

मृद्भक्षणस्यानिष्टकारितोद्घोषनेन तन्निवारयति—

नित्यं मृद्भक्षणाद्रक्षेत् तया स्युर्नियतं गदाः।
पाण्डुत्वक्षयपुरुषासकासातिसारजन्तवः।
कृद्दि मूर्च्छाग्निसदनस्तन्यद्वेषाः सरुक्भ्रमाः।

संसर्गजा दोषगुणा भवन्तीति कुमारधारकस्य गुणानाह—

अभियुक्तः सदाचारो नातिस्थूलो न लोलुपः। (१०)
कुमारधारः कर्त्तव्यस्तत्राद्यो बालचित्तवित्।

---

(९) आवश्यको विधिः स्वस्थदेहानुकूलव्यायामाच्छादनादिः। भासुरञ्च सर्व्वं न दर्शयेत् दृष्टिदोषभयात्।

(१०) अभियुक्तइति—कुमारचेष्टासु दत्तदृष्टिस्तद्रक्षणपरश्चेत्यर्थः अतिस्थूलः कुमारप्राणकः कथं कुमारं विकटगामिनं करोति? उच्यते।

वैपरीत्येऽनिष्टोत्पत्तिं दर्शयति—

अधार्मिकं दुराचारः स्थूलो बिकटगामिनम् ।
करोति लोलुपं बालं घस्मरत्वेन रोगिणम् ।

कुमारस्यानुमतानि क्रीडनकान्याह—

क्रीडनकानि खल्वस्य तु बिचित्राणि, घोषवन्ति, अभिरामानि, अगुरूणि, अतीक्ष्णाग्राणि, अनास्यप्रवेशीनि, अप्राणहराणि, अबित्रासनानि स्युः ।

भवति चात्र—

जातुषं घोषवच्चित्रमत्रासं रमणं बृहत् ।
अतीक्ष्णाग्रं गवाक्षादि मङ्क्ष्वमथवा फलम् ।

कुमारस्य क्रीड़ाभूमिमाह—

क्रीड़ाभूमिः समा कार्य्या निःशस्त्रोपलशर्करा । (११)
बिस्रोषणकणाक्षोभिः सिक्ता निम्बोदकेन वा ।

कुमारस्य पुरुषार्थसाधनहेतुभूतां क्रियां निर्दिशन्नाह—

शक्तिमन्तं यथावर्णं विद्यामध्यापयेत्ततः ।

अतिस्थूलानाञ्च स्थौल्यात् गतिवैकल्यं भवत्येव । बालस्तु यत् पश्यति गृह्णोति वा तदेवानुकरोति ; अतोऽतिस्थूलस्य कुमारधारकस्य गतिवैकल्यं सततं दृष्ट्वा दृष्ट्वा कुमारोऽपि बिकटगामी भवति । घस्मरत्वं भोजनप्रियत्वं । जातुषमिति लाक्षानिर्म्मितं ।

(११) निःशस्त्रोपलशर्करेति आघातभयात् । क्रीड़ाभूमौ विस्राद्यस्रक्षः निम्बोदकस्य वा सेकः रक्तक्षणवारणार्थो ज्ञेयः ।

इत्यायुर्व्वेदप्रकाशिकायां प्रथमोऽध्यायः ।

अनुशिष्यात् सदा चैनं धर्म्माय विनयाय च।
यथा नेन्द्रियदुष्टास्वै क्रियते यौवनागमे।

दन्तपवनभक्षणं नियमयन्नाह—

भक्षयेद्दन्तपवनं नाखिरद्विजबन्धनः।
तस्य तद् वदनक्लुद्धः कुर्य्याद्दन्तामयान् सरुक्।

इति बालोपचरणीयोनाम प्रथमोऽध्यायः।

अथ दन्तोद्भेदोनाम द्वितीयोऽध्यायः।

अन्नभेदेन बालानां त्रैविध्यं दर्शयति—

तत्रोनषोड़शवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति। तेषु सम्वत्सरपराः क्षीरपाः। द्विसंम्वत्सरपराः क्षीरान्नादाः। परतोऽन्नादा इति।

जातदन्तस्य कुमारस्याहारपरिवर्त्तनमुचित मतो दन्तोत्पत्तेर्हेतुं तत्पूर्व्वरूपमाह—

तत्रास्थिमज्जानौ दन्तोत्पत्तिहेतू। तौ तु धातू कालक्रमेण पच्यमानौ यदा दन्ताग्रय मनुप्रपद्येते तदास्य किञ्चिदुत्सेधेनोर्द्ध्वाधोदन्तमांससंघट्टनादङ्गहर्षो जायते। तद्गतेन च श्लेष्मणा कण्डूस्तदा चुचुकं दंदश्यते, यद् यदालभते तत् तदास्यमानयति।

दन्तोद्भेदकालमाह—

दन्तोद्भेदश्च दीर्घायुषोऽष्टमात् मासात् परतो वा प्रवर्त्तते। (१२) इतरेषान्तु चतुर्थान्ते। अतिबाल्ये दन्तोत्पादवेदनया पीड़िता न सम्यक् सम्पूर्णधातुबला भवन्ति।

कुमारदन्तोद्भेदकालस्य दुःखहेतुतां प्राग्वौपम्येन दर्शयति—

पृष्ठभङ्गे बिड़ालानां बर्हिणां शिखरोद्गमे।
दन्तोद्भेदे च बालानां नहि किञ्चिन्न दूयते ?॥

चिराद्दन्तोत्पत्तौ हेतुमाह—

मारुतश्चास्य दन्तमूले मूर्च्छति। ततः स कफानुविश्लेषोऽस्थिमज्जस्थितः सर्व्वतो विसरन् सह पित्तेन धातून् मलांश्च दूषयन् विशोषयति; तद्विज्ञाना मसम्भव एवेति।

भवति चात्र—

हनुमूलगतो वायु र्दन्तदेशान् विशोषयेत्।
यदा शिशोः प्रकुपितो नोत्तिष्ठन्ति ततो द्विजाः।

सञ्जातदशनस्य क्रमशः स्तन्यत्यागमुपदिशन्नाह—

अथैनं जातदशनं क्रमशोऽपनयेत् स्तनात्।

---

(१२) दन्तोद्भेदश्चेति। अधराश्च दन्ताः आदावेव जायन्ते तत ऊर्ध्वोत्तराः। विपर्य्यासेनोद्भेदनं दन्तेन सार्द्धं जननञ्च उत्पातभूतं मन्यते तथाच हृदये उक्तं—"यदन्तो जायते यस्तु दन्ताः प्रागेव यस्य चोत्तराः। कुर्व्वीत तस्मिंस्तत्पाते शान्तिकञ्च"—।

भीतिजनकं स्तनत्यागोपायमाह—

कुर्य्यादपस्तनं स्नेहसंक्रान्तया स्तनलेपनैः।
बीभत्सैर्यावकासेकक्लृप्तिमच्चतदर्शनैः।

अपस्तन्यस्य प्रीतिकरं भोज्यमाह—

पियालमज्जमधुकमधुलाजसितोपलैः।
अपस्तन्यस्य संयोज्यः प्रीणनो मोदकः शिशोः।

सञ्जातदन्तायाऽपि सहसा नान्नं देयमित्याह—

चिरान्निषेवमानोऽन्नं बालो नातूर्थ्यमश्नुते।
भजेद् यथा यथाचान्नं स्तन्यंत्याज्यन्तथा तथा
पूर्व्वोक्तं भोजयेत् क्षीरमन्नञ्च लघु बृंहणम्।

कुमारस्य दन्तपतनकालमाह—

यावन्मासस्य यो जात स्तावद्वर्षस्य स द्विजः।
पतति प्रायशोऽष्टानां तेषां पूर्व्वस्य सम्भवः।
इति दन्तोद्भेदविज्ञानीयो नाम द्वितीयोऽध्यायः।

अथ बालामयविज्ञानीयोनाम तृतीयोऽध्यायः।

व्यापन्नस्तन्यस्य व्याधिजनकत्वमाह—

क्षीरं हि यथोक्तै र्दोषकोपनै राहारविहारै र्धात्रा व्यापन्नं विविधामयोदयाय बालस्य कल्पते। (१३)

---

(१३) शारीरास्त्वन्नपानमूला इति शारीरव्याधिनिदानस्थं बालामयेष्वपि योजयितुमाह क्षीरं हीति।

भवन्ति चात्र—

धात्र्यास्तु गुरुभि र्भोज्यै र्विषमै र्दोषलैस्तथा।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदूषयति।
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः
दूषयन्ति पयस्तेन शारीरा व्याधयः शिशोः।
भवन्ति कुशलास्तांश्च भिषक् सम्यग्विभावयेत्।

अष्टानां स्तन्यदोषाणां निदानसंप्राप्तिकर्म्माण्याह—

अजीर्णासात्म्यविषम-विरुद्धात्यर्थ-भोजनात्।
लवणाम्लकटूष्णार-प्रक्लिन्नानाञ्च सेवनात्।
मनःशरीरसन्तापादस्वप्नान्निशि चिन्तनात्।
प्राप्तवेगप्रतीघातादप्राप्तोदीरणेन च।
परमाम्रं गुडक्षीरं कृशरं दधि मत्स्यकम्।
अभिष्यन्दीनि मांसानि ग्राम्यानूपौदकानि च।
भुक्त्वा भुक्त्वा दिवास्वप्नाद्व्यत्यति-निषेवणात्।
अनायासादभिघातात् क्रोधाच्चातङ्कदर्शनैः।
दोषाः क्षीरवहाः प्राप्य सिराःस्तन्यं प्रदूष्य तत्।
कुर्य्युरष्टविधं भूयो दोषास्तान् मे निबोधत।
वैरस्यं फेनसङ्घातं रौक्ष्यश्वेत्यनिलात्मके।
पित्तादृवैवर्ण्य-दौर्गन्ध्य स्नेहपैच्छिल्यगौरवम्।
कफाद् भवति रुक्षाद्यैरनिलः स्वैः प्रकोपनैः।
क्रुद्धः क्षीराशयं प्राप्य रसं स्तन्यस्य दूषयेत्।

वातदुष्टं स्तन्यं यत् करोति तदाह—

विरसं वातसंसृष्टं क्षयीभवति तत् पिबन् । (क)
न चास्य स्वदते क्षीरं कृच्छ्रेण स विवर्द्धते ।
तथैव वायुः कुपितः स्तन्यमन्तर्विलोड़यन् ।
करोति फेनसङ्घातं तत् तु कृच्छ्रात् प्रवर्त्तते ।
तेन क्षामस्वरो बालो बद्धविण्मूत्रमारुतः ।
वातिकं शीर्षरोगं वाऽपीनसं वाधिगच्छति ।
पूर्ब्ववत् कुपितः स्तन्ये स्नेहं शोषयतेऽनिलः ।
रूक्षं तत् पिबतो रौक्ष्याद् बलहासश्च जायते ।

पित्तदुष्टं स्तन्यं यत् करोति तदाह—

पित्तमुष्णादिभिः क्षुद्रं स्तन्याशयमभिप्लुतम् । (ख)
करोति स्तन्यवैवर्ण्यं नीलपीतसितादिकम् ।

(क) वातदुष्टं स्तन्यं विरसं फेनिलं रूक्षञ्च भवति । विरसं स्तन्यं कुमाराय न रोचते, तञ्च पिबन् अक्षयः कुमारः क्षयो भवति, वयोचितां परिवृद्धिञ्च चिरेण लभते । फेनिलं स्तन्यं अल्पाल्पं स्रवति, तत् पिबतः कुमारस्य विण्मूत्रं चिरेण कृच्छ्रात् निर्गच्छति अपानवायुश्च न सम्यक् प्रवर्त्तते । कण्ठस्वरः क्षीणो भवति, वातजं शिरोरोगं अपीनसञ्च प्राप्नोति । अपीनसलक्षणं यथा—"आनह्यते यस्य विधूप्यते च पाप्च्यते क्लिद्यति चापि नासा । नवेत्ति यो गन्धरसांश्च सम्यक् जन्तुर्जुषं व्यवखेत् तमपीनसेन" । तथाच चरके—"यो मस्तुलुङ्गाद् घनपीतपक्वां । कफं स्रवेद् गाढमपीनसः सः" ।

(ख) पित्तदुष्टं स्तन्यं विवर्णं दुर्गन्धि च भवति । खित्रः घर्म्मोक्तः । स्तन्यं नाड्रियते, कामला द्विविधा कोष्ठाश्रया शाखाश्रया च । तयोर्जलवच्च

विवर्णगात्रः क्लिन्नः स्यात् तृष्णालुर्भिन्नविट् शिशुः ।
नित्यमुष्णशरीरश्च नाभिनन्दति तत् स्तनम् ।
पूर्ब्बवत् कुपिते पित्ते दौर्गन्ध्यं क्षीरमृच्छति ।
पाण्डामय स्तत् पिबतः कामला वा भवेच्छिशोः ।

श्लेष्मदुष्टं स्तन्यं यत् करोति तदाह—

क्लेदो गुर्व्वादिभिः श्लेष्मा क्षीराशयगतः स्त्रियाः । (ग)
स्नेहान्वितत्वात् तत् क्षीर मतिस्निग्धं करोति तु ।

"तत्र कोष्ठाश्रितायान्तु कामलायां विशेषतः । तिलपिष्टनिभं वर्चस्तदा सृजति कामली । रक्तमार्गं यदा पित्तं श्लेष्मणा कुपितेन हि । शाखाख्यायाः कामलायाः शृणु मे हेतुलक्षणम् । रूक्षशीतगुरुस्वादुव्यवायैर्वेगनिग्रहैः । कफसंमूर्च्छितोवायुः स्थानात् पित्तं क्षिपेद् बहिः । हारिद्रनेत्रमूत्रत्वक् श्वेतवर्च्चास्तदा नरः । भवेत् साटोपविष्टम्भो गुरुणा हृदयेन च । दौर्ब्बल्याल्पाग्निश्वासार्त्तिहिक्काश्वासारुचिज्वरैः । क्रमेणाल्पेन सज्येत पित्ते शाखासमाश्रिते ।" न केवलं पित्तदुष्टं स्तन्यमपित्तु पयुषितं दुष्टाम्बुभिश्चितं नानागोप्रभवं व्याधितायाः मृतवत्सायाः प्रदुष्टवत्सायाश्च गोर्दुग्धं यदा पिबति कुमार स्तदा तस्यापि एवम्विधा व्याधयो जायन्ते । विशेषतस्तु यकृतोदृद्धिः, पाण्डुवर्णता, विड्विवन्धः, श्वेतवर्च्चस्त्वं, पीतनेत्रमूत्रत्वं, दुग्धवमनं, उष्णगात्रत्वं, सदा मन्दज्वरः, वेलावसाने ज्वरवृद्धिः अहेतुकं रोदनं निरन्तरं, प्रतिश्यायः, अरुचिश्च । यदि वर्षत्रयाभ्यन्तरे स्यात् अपिच शोथो विड्भेदो नासिका दन्तवेष्टेभ्यश्च रुधिरागमो भवेत् तदा न सिध्यति । शुद्धमपि गोदुग्धं स्तन्यं वा यदा विहितात् परं पीयते तदा तदपि व्याधिकारणं भवति ।

(ग) श्लेष्मदुष्टं स्तन्यं अतिस्निग्धं, पिच्छिलं गुरु भवति । तत् पिबतः कुमारस्य वृद्धिनिद्रालस्यमूनबक्त्राक्षित्वादयो भवन्ति ।

क्लेदं कुन्थनं तेन लालालु र्जायते शिशुः ।
नित्योपदिग्धैः स्रोतोभिर्निद्रालस्यसमन्वितः ।
श्वासकासपरीतस्तु प्रसेकतमकान्वितः ।
अभिभूय कफः स्तन्यं पिच्छिलं कुरुते यदा ।
लालालुः शूनवक्त्राक्षि जड़ः स्यात् तत् पिबन् शिशुः ।
कफः क्षीराशयगतो गुरुत्वात् क्षीरगौरवम् ।
अति स्नेहान्वितं पीत्वा बालो क्लेदोगमृच्छति ।
अन्यांश्च विविधान् रोगान् कुर्य्यात् क्षीरसमाश्रितान् ।

महतां व्याधीन् बालेष्वतिदिशन्नाह—

ज्वराद्याः व्याधयः सर्व्वे महतां ये पुरेरिताः
बालानामपि ते तद्वद् वोढव्या भिषगुत्तमैः ।

बालनिष्ठान् रोगानाह—

बालानामेव ये रोगा भवन्ति महतां न च ।
तालुकण्टकमुख्यांस्तानवधारय यत्नतः ।

तालुकण्टक माह—

तालुमांसे कफः क्लेदः कुरुते तालुकण्टकान् (घ)
तेन तालुप्रदेशस्य निम्नता मूर्द्धि जायते ।

(घ) स्वहेतुभिः क्लेदः कफः तालु-मांसे तालुकण्टकान् करुते । तालु पातः तालुप्रदेशस्य निम्नता । स्तनद्वेष इति स्तनं न पिबति क्लेदेन वा स्तनपानं । ग्रीवादुर्ब्बलता ग्रीवायाः शिरोधारणाक्षमता ।

तालुपातः स्तनद्वेषः कृच्छ्रात् पानं शकृद्भवम्।
तृड्चिकण्ठास्यरुजा ग्रीवादुर्व्वलता वमिः।

महापद्ममाह—

विसर्पस्तु शिश्नोः प्राणनाशनः शौर्षवस्तिजः (ङ)
पद्मवर्णो महापद्मरोगो दोषत्रयोद्भवः।
शकृद्भ्यां हृदयं याति हृदयाच्च गुदं व्रजेत्।

कुकूणकमाह—

कुकूणकं क्षीरदोषाच्छिशूनामेव वर्त्मनि। (च)
जायते सरुजं नेत्रं कण्डुरं प्रस्रवेद् बहु।
शिश्नः कुर्य्याल्ललाटाच्चिकूटनासाप्रघर्षणम्।
शक्तो नार्कप्रभां द्रष्टुं नचाच्युन्मीलनक्षमः।

अहिपूतन माह—

शकृन्मूत्रसमायुक्तोऽधीतेऽपाने शिश्नोर्भवेत्। (छ)
स्विन्ने वाऽस्नाप्यमानस्य कण्डूरक्तकफोद्भवा।

(ङ) शौर्षजः वस्तिजश्च। वस्ति र्मूत्राशयोपलक्षितोदेशः। शकृत् कर्षसमीपः ललाटैकदेशः।

(च) नेत्रे रुक् कण्डूः स्रावश्च जायते। प्रघर्षणं हस्ताभ्यां मर्द्दनं। नयनगोलकाकारवत् निमेषोन्मेषाश्रयं पटोलद्वयं 'वर्त्म' उच्यते।

(छ) मलोपलेपात् स्वेदाद्वा मालिन्याद् गुदे कफरक्तजो व्रणोभवेत्। कुपितौ कफरक्तौ कण्डूं जनयतः ततः कण्डूयनात् स्फोटा जायन्ते। तांश्च एकीभूता घोरं व्रणं कुर्व्वन्ति। मातृकादोषः प्रष्टारु गुदकुन्दमनामिक मित्यस्य नामान्तरं।

कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावाश्च जायन्ते।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्।

अजगल्लीमाह—

स्निग्धा सवर्णा ग्रथिता नीरुजा मृदुसन्निभा।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका।

पारिगर्भिकमाह—

मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि।
कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः।
युज्यते कोष्ठहृद्ग्रा च तमाहुः पारिगर्भिकम्।

स्तन्यातिपानेन परिगर्भिकलक्षण मजीर्णमाह—

अन्नेनोपहतं स्तन्यं पिबतो विहितात् परम्।
इमानेव गदान् कुर्य्यात् पारिगर्भिकलक्षणान्।

क्षीरालसकमाह—

यदातु (ज) पुनर्धातुसन्निपातप्रकोपनान्यासेवते तदाऽस्यास्रयो मला युगपद् वक्षोऽभिप्रपन्नाः क्षीरवहाः रसायनीः समनुश्रित्य सङ्कीर्णलिङ्गंस्तन्यं मावहन्ति। तच्चेदमविज्ञानात् सततमप्रत्यवेक्षणात् प्रमादाद्वा मातुः कुमारः पिबति। ततः स तेन सलिलोपममच्छं विच्छिन्न मामं दुर्गन्धि

(ज) धातुरत्र वातादिः, सङ्कीर्णलिङ्गमिति वातादिसन्निपातलिङ्गं, पुनश्चप्रभवोऽनुभावः। मन्दतां श्लसकवदिदं बालानां क्षीरालसकम्।

नानावर्णवेदनं फेनिलमतिसार्य्यते । पीतक्षेतमूत्रताविष्टम्भ-तृष्णाज्वरछर्दिविजृम्भिकाशुष्कोद्गारारुचिभ्रमाङ्गभङ्गविक्षेप-कूजनघ्राणाक्षिमुखपाकदृष्टयर्पणवक्त्ररसादयश्चास्य प्रादुर्भवन्ति । तं क्षीरालसकमत्ययं चाचक्षते ।

दन्तोद्भेदमूलान् रोगानाह—

दन्तोद्भेदश्च सर्व्वरोगायतनम् । विशेषेण तन्मूला ज्वरशिरोऽभितापतृष्णाभ्रमाभिष्यन्दकुकूणकपोथकीवमथु-कासश्वासातिसारविसर्पाः ।

अन्यच्च—

दन्तोद्भेदश्च रोगाणां सर्व्वेषामपि कारणम् ।
विशेषाज्ज्वर-विड्भेद-कासच्छर्दि-शिरोरुजाम् ।

शिशोररोचकादीनां निदानसंप्राप्ती आह—

प्रत्यङ्गः स्वप्नशीताम्बुश्लेष्मिकस्तन्य-सेविनः
शिशोः कफेन रुद्धेषु स्रोतःसु रसवाहिषु
अरोचकः प्रतिश्यायो ज्वरः कासश्च जायते ।
कुमारः शुष्यति ततः स्निग्धशुष्कमुखेक्षणः

विनामविजृम्भिके आह—

असम्यक् कल्पनाभावैः स्याद्विनामो विजृम्भिका ।

उल्वकमाह—

गर्भाम्भसामवमनात् श्लेष्मणः कण्ठगस्य वा। (क)
सम्पर्कात् हृदये दुष्टो मार्गानावृणुते रसः।
बद्धमुष्टिस्ततो मुह्येत् रोगैर्वालोऽभिभूयते।
हृद्रोगाक्षेपकश्वासकासच्छर्दिज्वरादिभिः।
उल्वकं सहजं व्याधिं मन्वपूर्णञ्च तं वदेत्।

दन्तशब्दमाह—

रुक्षाग्निनो वातिकस्य चालयत्यनिलः सिराः
हन्वास्रयाः प्रसुप्तस्य दन्तैः शब्दान् करोत्यतः

पञ्चारुजमाह—

दुष्टमन्नादिभिर्मातुः स्तन्यं संपिबतः शिशोः
यदा प्रकुपितं पित्तं गुदं समभिधावति।
तदा संजायते तत्र जलौकोदरसन्निभः।
व्रणः सदाहो व्यक्तोष्मा तदास्य स्याज्ज्वरः परः।
हरितं पीतकं वापि वर्च्चस्तेन भवेद्ध्रुवम्।
व्रणः पञ्चारुजो नाम व्याधिःपरमदारुणः।

(क) गर्भाम्भसामिति। "गर्भाम्भः सैन्धवयुता सर्षपा वामयेत्सतः" इति गर्भाम्भःवमनविधिरुपदिष्टस्तस्याकरणात्। जातस्य कुमारस्य कण्ठगतश्लेष्मापनयनमप्युपदिष्टं, यथा—"अथ जातस्य उल्वं सुखञ्च सैन्धवसर्षपा विशोध्य।" एतत्करणाच्च उल्वकं जायते। उल्वकं 'तड्का' इति नाम्ना ख्यातोवालामयविशेषः। रोगै र्वक्ष्यमानै र्हृद्रोगादिभिः। केचित् दन्तशब्दं सञ्जातक्रिमिलक्षणमाहुः।

व्याधिस्वरूपं प्रतिपादयितुमज्ञानां बालानां रोगज्ञानोपायमाह—

अङ्गप्रत्यङ्गदेशेषु रुजा यत्रास्य जायते । (ख)
मुहुर्मुहुः स्पृशति तं स्पृश्यमाने च रोदिति ।
निमीलिताक्षो मूर्द्धस्थे शिरो रोगे न धारयेत् ।
वस्तिस्थे मूत्रसङ्घातौ रुजा हृष्यति मूर्च्छति ।
विण्मूत्रसङ्ग-वैवर्ण्यच्छर्द्याध्मानान्त्रकूजनैः ।
कोष्ठे दोषान् विजानीयात् सर्व्वत्रस्थांश्च रोदनैः ।
इति बालामय-विज्ञानीयोनाम तृतीयोऽध्यायः ।

ग्रहार्त्तलक्षणवर्णनीयोनाम चतुर्थोऽध्यायः ।

प्रायः पर्व्वसु गृह्णन्ति ग्रहाश्छिद्रप्रहारिणः (१)
अविशन्तश्च लक्ष्यन्ते केवलं शास्त्रचक्षुषा ।
शुद्धेन देहं बालानां ग्रहगन्धर्व्वयोषिताम्

(ख) अङ्गप्रत्यङ्गदेशेष्विति । अङ्गं मुखादि प्रत्यङ्गं चक्षुःकर्णादि । यत् अङ्गं प्रत्यङ्गं वा शिशुर्बारम्बारं स्वयं स्पृशति तत्र रुजं विद्यात् । यस्मिन्नङ्गे प्रत्यङ्गे वाऽपरेण स्पृश्यमाने शिशुःक्रन्दति तत्रापि रुजं विद्यात् । अन्तरोगाधिष्ठानविज्ञानार्थमाह सर्व्वत्रस्थांश्चेति ।

(१) आदौ गृह्णोत्पत्तिकथा लिख्यते—पुरा कार्त्तिकेयस्य रक्षार्थं महादेवेन स्कन्दो, विशाखो, नैगमेषः, शुष्कगृहः, पित्तगृह इति पञ्च नरविग्रहाः, शकुनिः, पूतना शीतपूतना, अन्धपूतना, मुखमण्डलिका, रेवती, शुष्करेवतीति सप्त स्त्रीविग्रहा ग्रहा निर्म्मिताः । श्रूयते तु "स्कन्दग्रहस्तु प्रथमः स्कन्दा-

ग्रहाणां व्याधिकारणत्वे प्रमाणमाह—

आप्तं वाक्यं तत्समीक्ष्याभिधास्ये।
लिङ्गान्येषां यानि देहे भवन्ति॥

सामान्येन गृहोपसृष्टलक्षणमाह—

तेषां ग्रहिष्यतां रूपं प्रततं रोदनं ज्वरः। (२)
सामान्यरूपमुत्त्रासजृम्भाभ्रूत्क्षेपदीनताः
फेनस्रावोर्ध्वदृष्ट्योष्ठदन्तदंशप्रजागराः
रोदनं कूजनं स्तन्यविद्वेषः स्वरवैकृतम्।
नखैरकस्मात् परितः स्वधावाङ्गविलेखनम्।

परस्कारः एव च। शकुनी रेवती चैव पूतना चान्धपूतना। पूतना शीतनामा च तथैव मुखमण्डिका। नवमो नैगमेषश्च यः पिलृग्रहसंज्ञितः"। इति नवग्रहा एवोक्ताः। कथं ते निरपराधं बालं ग्रहन्ति अत आह छिद्रप्रहारिण इति। के ते छिद्रा अत्रार्थे सुश्रुतोक्तिर्यथा—तदुयुष्माकं सुभा हुतिर्बालेष्वेव भविष्यति। कुलेषु येषु नेज्यन्ते देवाः पितर एव च। ब्राह्मणाः साधवश्चैव गुरवोऽतिथयस्तथा। निहुताचारशौचेषु परपाकोपभोजिषु। ग्रहेषु तेषु ये बाला स्तान् ग्रहीष्यमणङ्किताः। तत्रबो विपुला हुतिः पूजाचैव भविष्यति। एवं गृहाः समुत्पन्ना बालान् ग्रहन्ति चाप्यतः। गृहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः।

(२) सुश्रुते तु सामान्येन गृहोपसृष्टलक्षणे त्वेतदु अधिकं पठ्यते—नष्टसंज्ञः, अर्द्धं निरीक्ष्यते, भिन्नाभवर्चा, निधि जागर्त्ति, दुर्बलः, मत्स्यक्लुङ्कुन्दरमत्कूणगन्धश्चेति।

स्कन्दार्त्तस्य लक्षणमाह—

तत्रैकनयनस्रावी शिरो विक्षिपते मुहुः (३)
हृतैकपक्षः स्तब्धाङ्गः सखेदः नतकन्धरः
दन्तखादी स्तनद्वेषी वस्यन् रोदिति विस्वरम् ।
वक्रवक्त्रः वमन् लालां भृशमूर्द्धं निरीक्षते ।
वसासृग्गन्धिरुद्विग्नो वङ्गसुष्टिश्चक्रच्छिशुः
चलितैकाक्षिगण्डभ्रूः सरक्तोभयलोचनः
स्कन्दार्त्तस्तेन वैकल्यं मरणं वा भवेद्ध्रुवम्

स्कन्दापस्मारार्त्तस्य लक्षणमाह—

संज्ञानाशो मुहुः केशलुञ्चनं कन्धरानतिः (क)
विनम्य जृम्भमाणस्य शकृन्मूत्रप्रवर्त्तनम् ।
स्तनखजिह्वासन्दंशसंरम्भज्वरजागराः
पूयशोणितगन्धश्च स्कन्दापस्मारलक्षणम् ।

---

(३) तत्रैकेति । एकस्मात् नयनात् अश्रुस्रावो भवति । शिर इति वारम्वारं मस्तकं लोठयते, हृतैकपक्ष इति पक्षैकवधो नाम वातव्याधिग्रस्त इत्यर्थः । नतकन्धरः नतग्रीवः । दन्तखादी दन्तैरन्यं दशतीत्यर्थः उद्विग्न अञ्चलचित्तः । वङ्गसुष्टीति । वङ्गविट् वङ्गसुष्टि च भवति । एकाक्षिगण्डभ्रूस्पन्दनं भवति । सुश्रुते तु सूनाचः क्षतजसगन्धिक इत्यपि पठ्यते । क्षतजगन्धिक ईषद्रक्तगन्धिकः ।

(क) संज्ञानाश इत्यादि । संज्ञानाशोमुहुरिति निःसंज्ञोभवति पुनः ससंज्ञो भवेत् । केशलुञ्चनं हस्ताभ्यां केशाकर्षणं उत्पाटनञ्च । विनम्येति । जृम्भासमये विनमतीत्यर्थः । स्तनेति । मातुर्धात्र्या वा स्तनं स्वस्य जिह्वाञ्च दशति । संरम्भः कोपः । कुमारो पूयशोणितगन्धिर्भवति ।

नैगमेयग्रहजुष्टस्य लक्षणमाह—

आध्मानं पाणिपादस्य स्यन्दनं फेननिर्वमः (ख)
तृणमुष्टिवन्धातिसारस्वरदैन्य-विवर्णताः।
कूजनं स्वननं कृर्हिकासहिध्माप्रजागराः
ओष्ठदंशाङ्गसङ्कोचस्तम्भवस्ताभगन्धताः
ऊर्द्धं निरीक्ष्य हसनं मध्ये विनमनं ज्वरः।
मूर्च्छैकनेत्रशोफश्च नैगमेयग्रहाकृतिः

स्वयग्रहजुष्टस्य लक्षणमाह—

कम्पो हृषितरोमत्वं स्वेदश्चक्षुर्निमीलनम् (ग)
वहिरायामनं जिह्मादंशोऽन्तः कण्ठकूजनम्।
धावन विट्सगन्धत्वं क्रोशनं श्वानवच्छुनि

(ख) स्यन्दनं चालनं। फेननिर्वमः फेनं वमति। स्वरदैन्यं स्वरेणैव कुमारस्य हीनता सूच्यते। विवर्णता गात्रस्येतिशेषः। कूजनं अव्यक्तशब्दोच्चारणं। स्वननं कण्ठघुर्घुरकं। कृर्हिर्वमनं। हिध्मा हिक्का। सङ्कोचस्तम्भवस्ताभगन्धताः अङ्गस्येतिशेषः, वस्तगन्धिता छागगन्धत्वं। मध्ये विनमनमिति मध्यदेशस्यानतिः। एकनेत्रशोफ एकचक्षुषः स्फोतिः।

(ग हृषितरोमत्वमिति कुमारोहृष्टरोमा भवति। स्वेदो घर्मनिर्गमः चक्षुर्निमीलनमिति चक्षुषी निमील्य तिष्ठति नतु उन्मीलनं करोति। वहिरायामनं वातव्याधिपठितं। जिह्मादंशइति स्वकीयेन दन्तेनेति शेषः। धावनमिति धावितुमुपक्रमते। विट्सगन्धत्वं पुरीषगन्धित्वं श्वानवत् क्रोशनं कुक्कुरवत् उच्चैः शब्दं करोति।

पित्तग्रहाभिजुष्टस्य लक्षणमाह —

रोमहर्षो मुहुश्वासः सहसा रोदनं ज्वरः (घ)
कासातीसारवमथुजृम्भातृट्शवगन्धिताः
अङ्गेष्वाक्षेपविक्षेपशीषस्तम्भविवर्णताः
मुष्टिबद्धः क्षुतिश्चात्रोर्वालस्य सुरः पित्तग्रहे ।

शकुनिग्रहाभिजुष्टस्य लक्षणमाह—

स्रस्ताङ्गत्वमतीसारोजिह्वातालुगले व्रणाः (ङ)
स्फोटाः सदाहरुक्पाकाः सन्धिषु स्युः पुनः पुनः
निश्यक्षि प्रविलीयन्ते पाकोवक्त्रे गुदेऽपिवा
भयं शकुनिगन्धत्वं ज्वरश्च शकुनिग्रहे ।

पूतनाग्रहाभिजुष्टस्य लक्षणमाह—

पूतनायां वमिः कम्प स्तन्द्रा रात्रौ प्रजागरः । (च)
हिध्माऽऽध्मानं शकृद्भेदः पिपासा मूत्रनिग्रहः
स्रस्तहृष्टाङ्गरोमत्वं काकवत्पूतिगन्धिता ।

(घ) सहसेति कारणं विना । वमथुर्वमनं । शवगन्धिता गात्रस्येति शेषः । अङ्गेष्विति अङ्गशब्दस्याक्षेपादिभिः सम्बन्धः । क्षुतिरिति अभुखावः ।

(ङ) स्रस्ताङ्गत्वमिति शिथिलगात्रत्वम् । दाहरुक्पाकान्विताः स्फोटाः सन्धिषु पुनः पुनः निशि दृश्यन्ते दिवसे प्रविलीयन्ते । शकुनिगन्धत्वं विहगगन्धत्वं ।

(च) शकृद्भेदः मलस्रावः । मूत्रनिग्रहः मूत्ररोधः ।

शीतपूतनाजुष्टस्य लक्षणमाह—

शीतपूतनया कम्पः रोदनं तिर्य्यगीक्षणम् (क)
क्षणान्तःकूजातिसारौ वसावद्विस्रगन्धिता ।
पार्श्वस्थैकस्य शीतत्व मुष्णत्वमपरस्य च ।

अन्धपूतनाजुष्टस्य लक्षणमाह—

अन्धपूतनया क्रद्दिज्वरकासोऽल्पनिद्रता: । (ज)
वर्चसोभेदर्व्वैवर्ण्यदौर्गन्ध्यान्यङ्गशोषणम्
क्षुत्सादोऽक्षिरुक् कण्डूपोथकीजन्म शूनता
हिध्मोद्वेगस्तनद्वेषवैवर्ण्यं स्वरतीक्ष्णता:
वेपथुर्मत्स्यगन्धत्वमथवासाम्लगन्धिता

सुखमण्डिताजुष्टस्य लक्षणमाह—

सुखमण्डितया पाणिपादास्यरमणीयता (झ)

(क) तीर्यगीक्षणं वक्रदृष्टिः । वसावदामगन्धित्वं गात्रस्येतिशेषः पार्श्वस्थेत्यादि । कुमारस्य शरीरैक-पार्श्वं शीतं पार्श्वान्तर मुष्णम् ।

(ज) वैवर्ण्यं दौर्गन्ध्यान्यङ्गस्येति शेषः । क्षुत्सादो अक्षिदौर्बल्यं । अक्षिरुक् नयनवेदना । पोथकी बालानां नेत्रवर्त्मजरोगविशेषः तल्लक्षणञ्च—"कण्डूस्रावान्विता गुर्व्वी रक्तसर्षपसन्निभाः । पिड़काश्च रुजावत्यः पोथक्य इति संज्ञिताः ।" शूनता शोथयुक्तत्वमङ्गानामितिशेषः । मत्स्यगन्धित्वमम्लगन्धित्वञ्च गात्रस्येतिशेषः ।

(झ) पाणिपादसुखस्य रमणीयता व्याधिप्रभावादेव । सिराधिरिति लक्षणवर्णाः सिरा उदरे दृश्यन्ते । अरोचकइति । शुभ्यते तु वक्त्राशोतिपठ्यते । अङ्गशैथिल्यं अङ्गग्लपनं अङ्गम्लानित्यं ।

सिराभिरसिताभाभिराचितोदरता ज्वरः
अरोचकोऽङ्गग्लपनं गोमूत्रसमगन्धता ।

रेवतीजुष्टस्य लक्षणमाह—

रेवत्यां श्यावनीलत्वं कर्णनासाक्षिमर्दनम् (अ)
कासहिध्माक्षिविक्षेपवक्त्रवक्त्वरक्तताः
वस्तगन्धोज्वरः शोषः पुरीषं हरितं द्रवम् ।
जायते शुष्करेवत्यां क्रमात् सर्व्वाङ्गसंक्षयः ।

असाध्यलक्षणमाह—

केशशातोऽन्नविद्वेषः स्वरदैन्यं विवर्णता ।
नानावर्णपुरीषत्वमुदरे ग्रन्थयः सिराः ।
रोदनं गद्गदत्वं दीर्घकालानुवर्त्तनम् ।
उदरे ग्रन्थयो वृत्ता यस्य नानाविधं शकृत्
जिह्वायां निर्गता मध्ये श्यावतालुञ्च तं त्यजेत्
भुञ्जानोऽन्नावहुविधं यो वालः परिहीयते
तृष्णागृहीतः श्यामाभो हन्ति तं शुष्करेवती
इति ग्रहार्त्तलक्षण-विज्ञानीयो नाम चतुर्थोऽध्यायः ।

(अ) श्यावनीलत्वमङ्गस्येतिशेषः । कर्णनासाक्षिमर्द्दनं स्वहस्ताभ्यामितिशेषः । विक्षेप इतस्ततः प्रेरणं । वक्त्रवक्त्वरक्तता इति वक्त्रस्यैव वक्त्वं रक्तत्वञ्च ।

मातृकाजुष्टलक्षण-विज्ञानीयोनाम पञ्चमोऽध्यायः।

प्रथमे दिवसे मासि वर्षे वा गृह्णाति नन्दा नाम मातृका। तया गृहीमात्रेण प्रथमं भवति ज्वरः। अशुभं शब्दं मुञ्चति। आत्कारञ्च करोति। स्तन्यं न गृह्णाति।

द्वितीये दिवसे मासे वर्षे वा गृह्णाति सुनन्दा नाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। चक्षुरुन्मीलयति। गात्रमुद्वेजयति। न शेते। क्रन्दति स्तन्यं न गृह्णाति। आत्कारञ्च करोति।

तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्र मुद्वेजयति। स्तन्यं न गृह्णाति। मुष्टिं बध्नाति, क्रन्दति, ऊर्द्धं निरीक्षते।

चतुर्थे दिवसे मासि वर्षे वा गृह्णाति मुखमूण्डिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। ग्रीवां नमयति। चक्षुरुन्मीलयति। स्तन्यं न गृह्णाति, रोदिति स्वपिति, मुष्टिं बध्नाति।

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति कटपूतना नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्र मुद्वेजयति, स्तन्यं न गृह्णाति, मुष्टिञ्च बध्नाति।

षष्ठे दिवसे मासे वर्षे वा गृह्णाति शकुनिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रभेदं दर्शयति। मुष्टिं बध्नाति। दिवारात्रावुत्थानं (मलोत्सर्गः) भवति। ऊर्ध्वं निरीक्षते।

सप्तमे दिवसे मासे वर्षे वा गृह्णाति शुष्करेवती नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्र मुद्दे जयति। मुष्टिं बध्नाति, रोदिति।

अष्टमे दिवसे मासे वर्षे वा गृह्णाति अर्थ्यका नाम मातृका। गृध्रगन्धः पूतिगन्धश्च जायते। आहारं न गृह्णाति। गात्रमुद्दे जयति।

नवमे दिवसे मासे वर्षे वा गृह्णाति सूतिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। नित्यं क्रन्दयति। गात्रभेदं दर्शयति। मुष्टिं बध्नाति। अतितरां निद्रा स्यात्।

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्र मुद्दे जयति। आत्कारं करोति। रोदिति, बध्नाति मूत्रं पुरीषञ्च।

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलि-पिच्छिका नाम मातृका। तया गृहीतमात्रेण प्रथमं

भवति ज्वरः । आहारं न गृह्णाति । अर्दितदृष्टिर्भवति । गात्रभङ्ग आत्कारश्च भवति ।

द्वादशे दिवसे मासे वर्षे वा यदि गृह्णाति कामुका नाम मात्रका तया गृहीतमात्रस्यादौ ज्वरो जायते । विहस्य वादयति, अङ्गुल्या तर्जयति, गृह्णाति, क्रामति, निःश्वसिति, मुहुर्मुहुस्फूर्जयति, आहारं न करोति ।

इति मात्रकाजुष्टलक्षण-विज्ञानीयोनाम पञ्चमोऽध्यायः ।

अथ बालामयप्रतिषेधोनाम षष्ठोऽध्यायः ।

वयोभेदेन बालानां भेषजदानपानविधि माह—

मृदुच्छेदनीयमौषधं मात्रया क्षीरपस्य क्षीरसर्पिषा धात्र्याश्च विदध्यात् । क्षीरान्नादस्यात्मनि धात्र्याश्च । अन्नादस्य कषायादीनामन्येव न धात्र्याः ।

ज्वरे विशेष माह—

एकं द्वे त्रीणि चाहानि वातपित्त-कफज्वरे ।
स्तन्यपायाऽहितं सर्पि रितराभ्यां यथार्थतः ॥

अपिच—

क्षीरपस्यौषधं धात्र्याः क्षीरान्नादस्य चोभयोः ।
अन्नादे वा शिशौ देयं भेषजं भिषजा सदा ॥

मात्रया लङ्घयेद्वापि शिशोर्नेष्टं विशोधनम् ।
सर्व्वं निवार्य्यते बाले स्तन्यस्तु न निवार्य्यते ॥
निवृत्तिर्वमनादीनां मृदुतां परतन्त्रताम् ।
बाक्चेष्टयोरसामर्थ्यं बीक्ष्य बालेषु शास्त्रवित् ।
भेजच्चाल्पमात्रन्तु यथाव्याधि प्रयोजयेत् ।
मधुराणि कषायाणि क्षीरवन्ति मृदूनि च ।
प्रयोजयेद् भिषग्बाले मतिमानप्रमादतः ।
अत्यर्थस्निग्ध-रूक्षोष्ण मम्लं कटु विपाकि च ।
गुरु चौषधपानान्न मेतद् बालेषु गर्हितम् ।
विरेकबस्तिवमनानृते कर्य्याच्च नात्ययात् ।

प्रकारान्तरेणौषधोपयोग माह—

येषां गदानां ये योगाः प्रवक्ष्यन्तेऽगदङ्कराः
तेषु तत् कल्कसंलिप्तौ पाययेत शिशुंस्तनौ ।

वयोभेदेन बालानां भेषजमात्रामाह—

जन्मनः प्रभृतिः मासं यावत् विड्भङ्गफलमात्रम्, मासादूर्द्धं क्षीरपाय अङ्गुलिपर्व्वद्वयग्रहसंमिता मौषधमात्रां विदध्यात् । कोलास्थिसंमितां कल्कमात्रां क्षीरान्नदाय ; कोलसंमितामन्नादायेति ।

अथ स्तन्यदोष-चिकित्सा।

विरसस्य स्तन्यस्य शोधनोपाय माह—

प्रपिबेद् विरसक्षीरा द्राक्षामधुकसारिवाम्। (१)
श्लक्ष्णपिष्टां पयस्याञ्च समालोभ्य सुखाम्बुना।
पञ्चकोलकुलत्थैश्च पिष्टैरालेपयेत् स्तनौ।
शुष्कौ प्रक्षाल्य निर्दुह्यात् तथा स्तन्यं विशुध्यति।

फेनिलस्य स्तन्यस्य शोधनोपाय माह—

फेनसङ्घातवत् क्षीरं यस्यास्तां पाययेत् च।
पाठानागरशार्ङ्गेष्टामूर्व्वाः पिष्टाः सुखाम्बुना। (२)
अञ्जनं तगरं दारु विल्वमूलं प्रियङ्गवः।
स्तनयोः पूर्व्ववत् कार्य्यं लेपनं क्षीरशोधनम्।

रूक्षस्य स्तन्यस्य शोधनोपाय माह—

षड्विरेकाश्चितीयोक्तै रौषधैस्तन्यशोधनैः। (३)
रूक्षक्षीरा पिबेत् क्षीरं तैर्व्वा सिद्धं घृतं पिबेत्।

---

(१) मधुकं मधुयष्टि, सारिवा अनन्तमूलं, सुखाम्बुना उष्णोदकेन। पञ्चकोलं यथा—पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्। निर्दुह्यादिति पीड़नेन दुग्धं निःसारयेत्।

(२) पाठा आकनादि, शार्ङ्गेष्टा काकमाची, मूर्व्वा सूचीमुखी, अञ्जनं रसाञ्जनं, तगराभावे कुष्ठं, दारु देवदारु, प्रियङ्गुः 'काउन' इतिप्रसिद्धः प्रियङ्गुनाम वणिक्द्रव्यस्था।

(३) स्तन्यशोधनानि यथा—पाठामहौषधसुरदारुसुस्तमूर्व्वागुडूचीवत्सकफलकिरातितिक्तकटुरोहिणीसारिवा इति। पाठादीनां क्षीरपरिभाषानुसारेण कृतं क्वाथं, पाठादीनां क्वाथेन पक्वं वा घृतं पिबेत्।

विवर्णस्य स्तन्यस्य शोधनोपाय माह—

यष्टिमधुकमृद्वीकापयस्याः सिन्दुवारिका। (४)
शीताम्बुना पिबेत् कल्कं क्षीरवैवर्ण्यनाशनम्।
द्राक्षामधुककल्केन स्तनौ वास्याः प्रलेपयेत्।
प्रक्षाल्य वारिणा चैव निर्दुह्यात् तौ पुनः पुनः।

स्तन्यस्य दौर्गन्ध्यनाशोपाय माह—

विषाणिकाजशृङ्ग्यौ च त्रिफलां रजनीं वचाम्। (५)
पिबेत् क्षीराम्बुणा पिष्ट्वा क्षीरदौर्गन्ध्यनाशनम्।
लिह्याद् बाष्पभयाचूर्णं सव्योषं माक्षिकाप्लुतम्।
क्षीरदौर्गन्ध्यनाशार्थं धात्री पथ्याशिनी तथा।
सारिवोशीरमञ्जिष्ठाश्लेष्मातकसचन्दनैः।
पत्राम्बुचन्दनोशीरैः स्तनौ चास्याः प्रलेपयेत्।

ताम्रावभासं पयः प्रियङ्गु-मुस्तशावरलोध्रैः शोधयेत्। (६) अम्लानुरसं पयः द्राक्षामधुकपयस्याश्रीप-

---

(४) मृद्वीका 'किसमिस,' पयस्या क्षीरकाकोलि, सिन्दुवारिका 'निसिन्दा'।

(५) विषाणिका काकोली, अजशृङ्ग्यौ कर्कटशृङ्ग्यौ, रजनी हरिद्रा। क्षीराम्बुनेति दुग्धमिश्रितेन जलेन। व्योषं त्रिकटु, माक्षिकं मधु। सारिवा अनन्तमूलं, उशीरं वीरणमूलं, श्लेष्मातकः बहुवारः 'लसोड़ा' इति हिन्दीभाषा नाम। चन्दनमत्र श्वेतचन्दनम्। पत्रं तेजपत्रं, अम्बु वालकं।

(६) प्रियङ्गु वणिकद्रव्यं, शावरलोध्रः श्वेतलोध्रः। मधूकं मधूकं पुष्पं मौवाफुल इति भाषा नाम। पयस्या क्षीरकाकोली, श्रीपर्णी गम्भारी

र्णीभिः । कटुकानुरसं पयः काकलीभ्यां विदारीभ्यां मधुपर्ण्याच । उष्णं पयः चन्दनोत्पलकमलैः शोधयेत् ।

स्निग्धस्य स्तन्यस्य शोधनोपाय माह—

स्निग्धक्षीरा दारुमुस्तपाठाः पिष्ट्वा सुखाम्बुना ।
पीत्वा ससैन्धवाः क्षिप्रं क्षीरशुद्धिमवाप्नुयात् ।

पिच्छिलस्य स्तन्यस्य शोधनोपाय माह—

प्रपिबेत् पिच्छिलक्षीरा शार्ङ्गेष्टाभयां वचाम् ।
मुस्तनागरपाठाश्च पीताः स्तन्यविशोधनाः ।
विदारी बिल्वमधुकैः स्तनौ चास्याः प्रलेपयेत् । (७)

गुरुनःस्तन्यस्य शोधनोपाय माह—

त्रायमाणामृतानिम्बपटोलत्रिफलामृतम् । (८)
गुरुक्षीरा पिबेदेतत् स्तन्य-दोषविशुद्धये ।
पृश्निपर्णीपयस्याभ्यां स्तनौ चास्याः प्रलेपयेत् ।

तस्या स्वग् ग्राह्या । काकोलीभ्यामिति काकोल्या क्षीर-काकोल्या च । विदारीभ्यामिति विदारी-क्षीर विदारीभ्यां । मधुपर्णी गुडूची, उत्पलं तदभावे 'नीलसुन्दि' । एताः षट् क्वाथकल्पनाः ।

(७) पीताः क्वाथकल्पनयेति शेषः । विदारी भूमिकुष्माण्डइति-प्रसिद्धः । बिल्वं बालबिल्वफलपेषिका, मधुकं यष्टिमधु ।

(८) त्रायमाणा गुर्ज्जरप्रसिद्धा, अमृतागुडूची, निम्बः प्रसिद्ध तस्य त्वक्, पटोलं तिक्तपटोलं तस्य नाडिर्ग्राह्या । पृश्निपर्णी 'चाकुले' इति प्रसिद्धः ।

क्षीरालसक-चिकित्सा माह—

तच्च धात्रीं बालञ्च पूर्व्वमेवाशु वामयेत् ।
विल्वितसंसर्गयोश्च मुस्तपाठाऽतिविषाककुभकटुकानाम्(९)
क्वाथं पानाय दद्यात् । भूनिम्बामृताकुटजफलसारिवानां वा । अनुवस्ते च यथाव्याधि प्रतिकुर्व्वीत ।

अथ दन्तोद्भेदजनकाः योगाः ।
दग्धपालीं समधुना चूर्णेन प्रतिसारयेत् । (१०)
पिप्पल्या धातकीपुष्पधात्रीफलकृतेन वा ।
लाव-तित्तिरवल्लूररजः पुष्परसाप्लुतम् ।
द्रुतं करोति बालानां दन्तकेसरवन्मुखम् ।
बचाद्विहृहतीपाठाकटुकातिविषाघुनैः । (११)
मधुरैश्च घृतं सिद्धं सिद्धं दशजन्मनि ।

---

(९) ककुभः अर्জ্জुनः । भूनिम्बः चिरता इति प्रसिद्धः कुटजफल मिन्द्रयवः ।

(१०) चिरयति दग्धोद्भेदे शिशोर्मांढीं पिप्पल्याचूर्णेन समधुना घर्षयेत्, धातकीपुष्पामलककृतेन चूर्णेन वा । लावः स्थलचरपक्षिविशेषः 'बटेर' इतिभाषानाम, तित्तिरोद्विविधः कृष्णगौरभेदेन तयोःकृष्ण तित्तिरि रिति गौरः कपिञ्जल इति कथ्यते । कृष्णतित्तिरस्याभावे वलाकामांसं ग्राह्यम् समगुणत्वात् । वल्लूरं सामान्येन शुष्कमांसं शूकरमांसं वा । लावादीनां मांसं शुष्कीकृत्य सङ्गृह्य च मधुना शिशुं लेहयेत् ।

(११) द्विहृहतीति क्षुद्रफला हृहत्फला च हृहती । कण्टकारी हृहती वा । घनं मुस्तकम् । मधुरैश्चेति । मधुरवर्गोक्तानां (सौश्रुत सूत्रः ४२ अः) द्रव्याणां कल्कीकृतानां गृहणं । सिद्धं फलप्रदम् ।

सामान्यतो दन्तोद्भवोद्भवानां रोगानां चिकित्सामाह —

समङ्गाधातकीलोध्र-कुटन्नटवलाह्वयैः (१२)
महासहाक्षुद्रसहा-क्षुद्रविल्वशलाटुभिः
सकार्पासीफलैः स्तोये साधितैः साधितं घृतम् ।
क्षीरमस्तुयुतं हन्ति शीघ्रं दन्तोद्भवोद्भवान् ।
विविधानामयानेतद् वृद्धकाश्यपनिर्म्मितम् ।
दन्तोद्भवेषु रोगेषु न बालमतियन्त्रयेत् ।
स्वयमप्युपशाम्यन्ति जातदन्तस्य यद्गदाः ।

वातज्वर-चिकित्सामाह —

भद्रदारु घनं यष्टी समङ्गा सितोपला (१३)
वातज्वरपरीताङ्गः पिबेदन्नुपानकम् ।

पित्तज्वर-चिकित्सामाह —

लाजनीलोत्पलकणामधुराञ्जनशर्करम् । (१४)
पित्तज्वरमतीसारं मधुलीढं निवर्त्तयेत् ॥

---

(१२) समङ्गा वराहक्रान्ता, कुटन्नटः नागरमुस्तकं । वला श्वेतपुष्पा 'वेड़ेला' इति ख्यातः । महासहा माषपर्णी, क्षुद्रसहा मुद्गपर्णी । क्षुद्रः रक्तपुनर्नवा । विल्वशलाटुः शुष्कीकृता बालविल्वपेषिका । समङ्गादिभिः क्वाथ्यैः सामान्यविधिना क्वाथः करणीयः । मस्तुक्षीर-युतमिति प्रत्येकं घृतसमं । उक्तं दधि द्विगुणवारियुतन्तु मस्तु, अस्त्रादियोगेन नष्टीकृतस्य दुग्धस्य द्रवांशो मस्तु इति केचित् ।

(१३) भद्रदारुः देवदारुः, घनं मुस्तकम्, यष्टी मधुयष्टिः, समङ्गा वराहक्रान्ता, सितोपला मिश्रीति ख्याता ।

(१४) नीलोत्पलाभावे नीलशुन्धिः । कणा पिप्पली, मधुरा काकोली,

श्लेष्मज्वर-चिकित्सामाह—

सबिल्वकुष्ठवरुणरेणुकामिशिभिः कृतः।
श्लेष्मज्वरहितो लेपस्तैलमभ्यञ्जनं च तैः।

सर्व्वज्वर चिकित्सामाह—

भद्रमुस्ताभयानिम्बपटोलमधुकैः कृतः। (१५)
क्वाथः कोष्णः शिशोरेष निःशेषज्वरनाशनः।

अतिसारान्वितस्य ज्वरादिकस्य चिकित्सामाह—

हरिद्राद्वययष्ट्याह्वसिंह्रीशक्रयवैः कृतः। (१६)
शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित्।
घनकृष्णारुणाभृङ्गीचूर्णं क्षौद्रेण संयुतम्।
शिशोर्ज्वरातिसारघ्नं कासश्वासवमीहरम्।
धातकीबिल्वधन्याकलोध्रेन्द्रयववालकैः।
लेहः क्षौद्रेण बालानां ज्वरातिसारवान्तिजित्।

भृङ्गनं कृष्णपाषाणाकृति धातुद्रव्यं रसाञ्जनमिति ख्यातं। रेणुका क्षुद्रवर्त्तुलाकृति वणिक्द्रव्यं। मिशि मह्रीतिख्यातः। श्लक्ष्णं सङ्चूर्ण्य मधुना शिशुं लेहयेत्। बिल्वादिभिः पक्वं तैलमभ्यञ्जनार्थं देयमिति।

(१५) भद्रमुस्तं नागरमुस्तकं, अभया हरीतकी, निम्बस्य त्वक्, पटोलं तिक्तपटोलं तस्य प्रतानं, मधुकः मधुयष्टिः। कोष्णः ईषदुष्णः।

(१६) हरिद्राद्वयमिति हरिद्रा दारुहरिद्रा च। यष्ट्याह्वः मधुयष्टिः सिंह्री कण्टकारी, शक्रयव इन्द्रयवः। घनं मुस्तकं, कृष्णा पिप्पली, अरुणा 'आतदूष' इतिप्रसिद्धः, भृङ्गी कर्कटशृङ्गी, बालकं बाला।

अतिसार-चिकित्सामाह—

बिल्वञ्च पुष्पाणि च धातकीनाम् । (१७)
जलं सलोध्रं गजपिप्पली च ।
क्काथावलेहौ मधुना बिभिश्यौ
बालेषु योज्यावतिसारितेषु ।
समङ्गाधातकी-लोध्र-सारिवाभिः श्रृतं जलम् ।
दुर्बरेऽपि शिशोर्देयमतीसारे समाक्षिकम् ।

आमातीसार-चिकित्सामाह —

बिड़ङ्गान्यजमोदा च पिप्पलीतण्डुलानि च । (१८)
एषामालोड्य चूर्णानि सुखं तप्तेन वारिणा ।
आम प्रवृत्तेऽतिसारे कुमारं पाययेद् भिषक् ।

प्रवाहिका-चिकित्सामाह—

लाजामयष्टिमधुकं शर्करा चौद्रमेवच । (१९)
तण्डुलोदकसंयुक्तं क्षिप्रं हन्ति प्रवाहिकाम् ।

---

(१७) बिल्वं बालबिल्वपेषिका, धातकीपुष्पं, जलं बाला, गजपिप्पली चविकायाः फलं, क्काथावलेहाविति क्काथकल्पनया चूर्णेन च । समङ्गा वराहक्रान्ता, सारिवा अनन्तमूलं, माक्षिकं मधु ।

(१८) अजमोदा वन्ययमानी, पिप्पलीतण्डुलं पिप्पलीशस्यं, सुखं-तप्तेनेति ईषदुष्णेन ।

(१९) तण्डुलोदकनिर्माणविधिः—कणशैःकृतमातपतण्डुलं पलमेकं चतुर्गुणे शीतोदके प्रहरमेकं संस्थाप्य मर्दयित्वा वस्त्रेण क्वाथयित्वा च ग्राह्यं ।

रक्तप्रवाहिका-चिकित्सामाह—

लेहस्तैलसिताक्षौद्रतिलयष्ट्याह्वकल्कितः (२०)
बालस्य रुग्व्यान्वियतं रक्तस्रावप्रवाहिकाम् ।
मूलत्वचं वत्सकस्य पलमेकं सुकुट्टितम् । (२१)
अष्टभागं जलं दत्त्वा चतुर्भागावशेषितम् ।
अतिविषा च पाठा च जीरकं विल्वमेव च ।
आम्रास्थि शतपुष्पञ्च धातकी मुस्तकं तथा
जातीफलञ्च सच्चूर्णं निक्षिपेद् तत्र यत्नतः ।
बालानामामशूलघ्नो रक्तस्रावं सुदारुणम् ।
अपि वैद्यशतैस्त्यक्तं जयेदेतन्न संशयः ।

गृहणी चिकित्सामाह—

सितजीरकसर्ज्जचूर्णं विल्वदलोत्थाम्बुमिश्रितं पीतम् (२२)

---

(२०). तैलं तिलतैलं, सिता इक्षुजाता शर्करा, क्षौद्रं मधु, तिलं कृष्णतिलं त्वचाक्षीरं, यष्टात्वं मधुयष्टिकं, तिलमधुयष्टिकयोश्चूर्णं तैलादिभिर्लेह्यं ।

(२१ जलं पलाष्टकं पलद्वयावशिष्टं अवतार्य वस्त्रेण क्वाथयित्वा पुनः पक्तव्यं । किञ्चिद्घनीभूते अवतार्य दार्ब्बया पुनः पुनः परिघट्य यदा पाणिसंश्लेषो भवेत् तदा अतिविषादि जातिफलान्तानां तोलकचतुष्टयं मिलितं श्लक्ष्णचूर्णं देयम् ।

(२२) सितजीरकः शुभ्रजीरकः, सर्ज्जः धुनाद्रतिख्यातः विल्वदलोत्थाम्बु विल्वपत्ररसः । गुडसहित इति । द्वितीयोयोगः । महौषधं शुण्ठी, मरिचादीनां चूर्णं इक्षुगुडमधुरीकृतेन तक्रेणालोड्य दातव्यं । शक्रमिन्द्रयवः, चाम्बु बाला, मोचा शाल्मलीनिर्य्यासः मोचरस इति ख्यातः । अन्द्रोसुस्तकं । सिद्धमिति क्षीरपरिभाषयेति शेषः ।

हन्त्यामरक्तशूलं गुडसहितः श्वेतसर्ज्जो वा
मरिचमहौषधकुटजं द्विगुणोक्तमुत्तरोत्तरं क्रमशः
गुडतक्रयुक्तमेतद् ग्रहणीरोगं निहन्त्याशु ।
विल्वशक्राम्बुमोचाब्दसिद्धमाजं पयः शिशोः
समांसरक्तां ग्रहणीं पीतं हन्यात् चिराच्चतः ।
तद्वदजाक्षीरसमो जम्बुत्वगुद्भवो रसः ।
चाङ्गेरीस्वरसे सर्पिस्छागक्षीरसमे पचेत् । (२३)
कपित्थशोषसिन्धूत्थसमङ्गोत्पलवालकैः ।
सविल्वधातकीमोचैः सिद्धं सर्व्वातिसारनुत्
ग्रहणीं दुस्तरां हन्ति बालानान्तु विशेषतः ।

कासश्वास चिकित्सामाह—

मुस्तकातिविषावासाकणाशृङ्गीरसं लिहेत् ।
मधुना मुच्यते बालः कासैःपञ्चभिरुत्थितैः ।
व्याघ्रीसुमनसं जातीकेशरैरवलेहिका ।
मधुना चिरसञ्जातान् शिशोः कासान् व्यपोहति ।
द्राक्षायासाभयाकृष्णाचूर्णं सक्षौद्रसर्पिषा ।
लीढ़ं कासं निहन्त्याशु श्वासञ्च तमकन्तथा ।

---

(२३) चाङ्गेरी आमरूलशाक इति प्रसिद्धः । चाङ्गेरीस्वरसछागक्षीरयोः प्रत्येकं घृतसमं । कपित्थस्य आमफलशस्यं, शोषं त्रिकटु, सिन्धूजन्म सैन्धवलवणं, कपित्थादीनां मोचान्तानां कल्कः स्नेहचतुर्थांशः ग्राह्यः । कल्कस्तु स्नेहपादिक इति वचनात् ।

पुष्करातिविषाशृङ्गीमागधीधन्वयासकम् ।
चूर्णितं मधुनालीढं शिशूनां पञ्चकासनुत् ।

कासज्वर-चिकित्सामाह—

शृङ्गीं समुस्तातिविषां विचूर्ण्य
लेहं विदध्यान्मधुना शिशूनाम् ।
कासज्वरच्छर्दिभिरर्दितानां
समक्षिकाञ्चातिविषां तथैकाम् ।

शुष्ककास-चिकित्सामाह—

शुष्ककासे कुमारस्य धात्र्याः स्तन्यविशोधनम् । (२४)
माषसूपः प्रयोक्तव्यः सकृष्णो घृतभर्जितः ।

दुग्धवमनस्य चिकित्सामाह—

आम्रास्थिलाजसिन्धूत्थं सक्षौद्रं छर्दिनुद् भवेत् ।
पीतं पीतं वमेद् यस्तु स्तन्यं तं मधुसर्पिषा ।
द्विवार्त्ताकीफलरसं पञ्चकोलञ्च लेहयेत् । (२५)

---

(२४) स्वरसस्याभावे चूर्णं ग्राह्यं । जासाया मूलं देयं, कणा पिप्पली, व्याघ्री सुमनसमिति कण्टकारीकुसुमं, जाति जातिफलं, केशरं जैत्रीति प्रसिद्धं । यासः दुरालभा, कृष्णा पिप्पली, पुष्करामावे कुष्ठं, भागधी पिप्पली, धन्वयासकं मरुजाता दुरालभा ।

(२५) द्विवार्त्ताकीति क्षुद्रफला बृहत्फला च बृहती तयोःफलस्वरसं । पञ्चकोलन्तु पिप्पली, पिप्पलीमूलं चव्यं चित्रकं नागरञ्च ।

नाभिशोथ-चिकित्सामाह—

घृतपिण्डेनाग्नितप्तेन क्षीरसिक्तेन सोष्मणा । (१)
स्वेदयेदुत्थितां नाभिं शोथस्तेनोपशाम्यति ।

नाभिपाक-चिकित्सामाह—

नाभिपाके निशालोध्र-प्रियङ्गुमधुकैःशृतम् ।
तैलं मभ्यञ्जने शस्तं मेभिर्वाप्यवचूर्णनम् । (२)
दग्धेन क्षागशकृता नाभिपाकेऽवचूर्णनम् । (३)
त्वक्चूर्णैः क्षीरिणां वापि कुर्य्याच्चन्दनरेणुना ।

मुखपाक-चिकित्सामाह—

मुखपाकेतु बालानां साम्रसारमयोरजः । (४)
गैरिकं क्षौद्रसंयुक्तं भेषजं सरसाञ्जनम् ।
अश्वत्थेवग्दलक्षौद्रैर्मुखपाके प्रलेपनम् ।

---

(१) केशतूषशर्करादि-रहितेन घृतेन पिण्डान् निर्म्माय तानातप्ते विशोध्य अग्नितप्तान् कृत्वा गोदुग्धेन सेचयेत् । बाष्पसुद्वमद्भिस्तैः पिण्डैः सुखोष्णैः कुमारस्य नाभिं स्वेदयेत् ।

(२) निशा हरिद्रा, एतेषां कल्कैः स्नेहपादमितैः पक्वं तिलतैलं प्रशस्तं मभ्यङ्गार्थं । अवचूर्णनं एतेषां श्लक्ष्णचूर्णेन नाभिपूरणम् ।

(३) क्षीरिवृक्षा यथा—वटाश्वत्थोडुम्बरप्लक्षशिरीषाः, एतेषां त्वक्-चूर्णैः । चन्दनरेणुना श्वेतचन्दनचूर्णेन वस्त्रपूतेन नाभिपूरणं कर्त्तव्यम् ।

(४) आम्रसारेति—आम्रस्य सारकाष्ठभवं चूर्णं, गौरिकं, धातुरसाञ्जनं, मधुना लेपनं कर्त्तव्यम् । अश्वत्थेति । अश्वत्थस्य त्वक् पत्रञ्च गृहीत्वा कुट्टयित्वा रौद्रे शुष्कीकृत्य चूर्णयित्वा च मधुना प्रलेपयेत् । दार्व्वीति । दार्व्वी दारुहरिद्रा; यष्टिः यष्टिमधु, अभया हरितकी, जाति चामेलीति

दार्व्वीयष्ट्यभयाजातीपत्रक्षौद्रैस्तथापरम् ।
सह जम्बीररसेन स्नुग्दलरसघर्षणं सदा: ।
क्षतमुपहन्ति हि पाकं मुखजं बालस्य चाक्षेव ।

गुदपाक-चिकित्सामाह—

गुदपाकेतु बालानां पित्तघ्नीं कारयेत् क्रियाम् । (५)
रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ।
शङ्खयष्ट्याञ्जनैर्चूर्णं शिशूनां गुदपाकनुत् ।

स्तन्यपानविरते चिकित्सामाह—

गृह्णाति सूतिकागारे न स्तनं चेत् स्पृशेत् तत: । (६)
पथ्याधात्रीफलकणै र्जिह्वां सघृतमाक्षिकै: ।

रुदते त्रस्यते च यत् कार्यं तदाह—

पिप्पलीत्रिफलाचूर्णं घृत-क्षौद्र-परिप्लुतम् ।
रुदते त्रस्यते चावलेहं दद्यात् सुखावहम् ।

भाषानाम, तस्या: पत्रं सर्व्वं मधुना पिष्ट्वा प्रलेपयेत् । सहजम्बीरेति ।— तुलसीपत्ररस: स्तोकं, स्नुक् स्नुही मनसा इति भाषानाम तस्या: पत्ररस: बहु गृहीत्वा मिश्रनीयम् । तत: कार्पासतूलिकया मुहुर्लेपनम् ।

(५) रसाञ्जनमिति दार्व्वीकाथोद्भवं कृत्रिमं रसाञ्जनं 'रसोत्' इति प्रसिद्धम् । दग्धशङ्खचूर्णं स्तोकं मधुयष्टिरसाञ्जनयोश्चूर्णं भूरि गृहीत्वा चूर्णनं कार्य्यम् ।

(६) कुमार: सूतिकागारस्थ: स्तन्यं यदि न गृह्णाति तदा हरीतक्याम लकी-पिप्पली-चूर्णैर्घृतमधुयुक्तै स्तस्य जिह्वां स्पृशेत् स्तोकं लेहनार्थं दद्यादित्यर्थ: । मधु तथा देयं यथा कटुत्व माच्छादितं भवेत् ।

आनाहवातशूलस्य चिकित्सामाह—

घृतेन सिन्धुविखैला-हिङ्गुभार्गीरजो लिहन्। (७)
आनाहं वातिकं शूलं हन्यात् तोयेन वा शिशुः।

मूत्रघातस्य चिकित्सामाह—

कणोषणासिता-क्षौद्र-सूक्ष्मैलासैन्धवैः कृतः। (८)
मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः।

शोथचिकित्सामाह—

मुस्तं कुष्माण्डबीजानि भद्रदारु-कलिङ्गकान्।
पिष्ट्वा तोयेन संलिप्तं लेपोऽयं शोथहृच्छिशोः।

तालुकण्टक-चिकित्सामाह—

हरीतकीवचा कुष्ठं कल्कं माक्षिकसंयुतम्। (९)
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात्।

कक्षणकचिकित्सामाह—

फलत्रिकं लोध्र-पुनर्णवे च। (१०)
सशृङ्गवेरं वृहतीद्वयञ्च।

---

(७) सिन्धुः सैन्धवं बिम्बं शुण्ठी, एला स्थूलैला, भार्गी बासुनहाटीति प्रसिद्धा। रजस्तूर्णं। घृतेन तोयेन वा।

(८) कणा पिप्पली, उषणा मरिचं, सिता शर्करा, क्षौद्रं मधु।

(९) हरितकीनां प्रत्येकं समं; मानानुक्तौ एवं सर्व्वत्र। कल्कं स्तन्ययोगे दृश्यदि सुपिष्टं।

(१०) फलत्रिकं त्रिफला, द्वे पुनर्नवे रक्तश्वेतभेदेन। सशृङ्गवेरं सार्द्रकं, वृहतीद्वयं क्षुद्रफला वृहत्फला च वृहती, क्षुद्रफला वृहती कण्टकारीचेति

आलेपनं श्लेष्महरं सुखोष्णम् ।
ककूणके कार्य्य मुदाहरन्ति ।

अहिपूतनचिकित्सामाह—

तत्र धात्र्याः पयः शीध्रं पित्तश्लेष्महरौषधैः । (११)
सिद्धं शीतञ्च शीताम्बु युक्त मुत्तरपानकम् ।
सक्षौद्रतार्क्ष्यशैलेन व्रणं तेन च लेपयेत् ।
त्रिफलाबदरीप्लक्षत्वक्-क्वाथ परिषेचितम् ।
कासीस-रोचनातुत्थमनोह्वालरसाञ्जनैः ।
लेपयेदम्लपिष्टैर्व्वा चूर्णितैर्व्वाबचूर्णयेत् ।
सुश्लक्ष्णे रथवा यष्टीशङ्ख-सौवीरकाञ्जनैः ।
सारिवाशङ्खनाभिभ्या मसनस्य त्वचाऽथवा ।
रागकण्डूत्कटे कुर्य्याद्रक्तस्रावं जलौकसा ।

केचित । आलेपनं आर्द्रमहिषत्वक्तुल्यस्थूलं चक्षुषोवहि र्देयम् । सुखोष्ण मीषदुष्णं ।

(११) पित्तश्लेष्महरौषधैरिति पित्तश्लेष्मदुष्टस्तन्यशोधनार्थं यदुपदिष्टं तै रौषधैः सिद्धं शीतञ्च धात्र्याः पेयम् । अनु च शीताम्बु पेयम् । द्वितीय योगमाह सक्षौद्रेति । तार्क्ष्यशैलं रसाञ्जनं । परिषेचनमाह त्रिफलेति । त्रिफलायाः फलं बीजहीनं, बदरीप्लक्षयो स्त्वक्, प्लक्षः पाकुड़इति प्रसिद्धः । एभिः क्वाथैर्व्रणं सेचयेत् । कासीस फीकाकस इति प्रसिद्धः, रोचना गोरचना, तुत्थ 'तुतिया' इति ख्यातः, मनोह्वा मनःशिला, आलं हरिताल' वंशपत्राख्यं, अम्लपिष्टै र्जम्बीररसपिष्टैः एभिर्लेपयेद् व्रणं । चूर्णितैर्व्वा एभिरबचूर्णयेत् । योगान्तरमाह सुश्लक्ष्णैरिति । यष्ट्यादिभि रबचूर्णयेत् सारिवाशङ्खनाभिभ्यामित्येकोयोगः । असनस्य 'पियाशाल' इति ख्यातस्य ।

उल्वक-चिकित्सामाह—

व्योषशिवोग्रारजनी-कल्कं स्तन्येन पीतमथ पयसा । १२
उल्वं निःशेषं कुरुते पटुतां बालस्य चात्यन्तम् ।
तर्कधोगुडिकां तप्तां निर्वाप्य कटुतैलके ।
तत् तैलं पानतो हन्ति बालानामुल्वमुद्धतम् ।

नयनामयचिकित्सामाह—

पिष्टैश्छागेन पयसा दार्व्यामुस्तकगैरिकैः । (१३)
बहिरालेपनं शस्तं शिशोर्नेत्रामयापहम् ।

पारिगर्भिकचिकित्सामाह—

पारिगर्भिक-रोगेतु युज्यते बह्निदीपनम् । (१४)
पिप्पली-पिप्पलीमूल-कटुका-देवदारुभिः ।
क्षारद्वय-विड्राजाजी-बिल्वमध्याग्निदीप्यकैः ।
दधि-सौवीरकसुरामण्डैश्च विपचेद् घृतम् ।
हन्ति प्रयुक्तं तत्काले रोगान् पारिभवाश्रयान् ॥

---

(१२) व्योषं त्रिकटु, शिवा हरीतकी, उग्रा यमानी, रजनी हरिद्रा, पयसा गोदुग्धेन। तर्कु 'टाकुया' इति भाषा।

(१३) दार्व्यौ दारुहरिद्रा, बहिर्नेत्रयोः रितिशेषः। आलेपक्रमस्तु प्रागुक्त एव।

(१४) पारिगर्भिके अग्निदीपनं भेषजं शस्तम्। अग्निवर्द्धकं घृतमाह पिप्पलीति। क्षारद्वयमिति सर्ज्जिका यवक्षारश्च। अजाजी कृष्णजीरकः, बिल्वमध्यं बिल्वपेषिका, अग्नि श्वित्रकोरक्तः, दीप्यकं यमानी। पिप्पल्यादीनां दीप्यकान्तानां कल्कः स्नेहपादिको ग्राह्यः।

क्षतविसर्प-विस्फोटज्वरचिकित्सामाह—

पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् । (१५)
क्षतविसर्परिष्फोटज्वराणां शान्तये शिशुः ।

सिध्मपामाविचर्चिका-चिकित्सामाह—

गृहधूमनिशाकुष्ठराजिकेन्द्रयवैः शिशोः । (१६)
लेपस्तक्रेण हन्त्याशु सिध्मपामाविचर्चिकाः ।

मुखस्रावचिकित्सामाह—

सारिवातिललोध्राणां कषायोमधुकस्य च । (१७)
संस्राविनि मुखे शस्तो धावनार्थं शिशोः सदा ।

नालपातेप्युक्षतस्य नाभेश्चिकित्सामाह—

पञ्चमेऽह्नि पतेन्नालं लेपयेद् वा गुडाम्भसा । (१८)
सान्द्रेण भूमौ घृष्टेन नालपातेऽपि चोक्षताम् ।

---

(१५) अरिष्टं निम्बं अस्य त्वक् पत्रम्बा। शिशुरिति क्षीराद्दादो ऽद्यादो वा। क्षीरपोऽपि शिशुर्यदा केवलं गव्यमाजं वा दुग्धं मातस्तन्यस्याप्रचुरतया गव्यमाज मपि दुग्धं सार्द्धं मातस्तन्येन पिबति तदा स बालः क्षीरपोऽपि स्वयं क्वाथादिकं पिबेत् नतु तस्य माता धात्री वा।

(१६) गृहधूम "झुल" इति भाषा, राजिका सर्षपः।

(१७) सारिबा अनन्तमूलं, मधुकः मधुयष्टिः, कषायेनानेन मुख-धौतिः कार्य्या प्रतिदिनं प्रातः सायञ्च।

(१८) गुडार्द्धं जलं गृहीत्वा भूमौ मेलयेत्, सान्द्रीभूते तेन नाभिं लेपयेत्।

विनाम-विजृम्भिकाया चिकित्सामाह—

असम्यक् कल्पनाभेः स्याद्विनामो विजृम्भिका।
वातपित्तहरं कर्म्म तत्रान्तर्बहिराचरेत्।

तृष्णाचिकित्सामाह—

दाड़िमस्य च बीजानि जीरकं नागकेशरम्।
चूर्णितं शर्कराक्षौद्रलीढं तृष्णानिवारणम्।

अतिक्षुधाया चिकित्सामाह—

अत्युद्रिक्तक्षुधं बालं परिभूतन्तु लेहयेत। (१९)
विदारीयवगोधूमकणाचूर्णं घृताप्लुतम्।
पाययेदनु च क्षीरं सृतं समधुशर्करम्।

मृत्तिकोद्भवानां रोगानां चिकित्सामाह—

पाठावेल्लहरिद्रानीमुस्तभार्गीपुनर्नवैः। (२०)
सविल्वत्रुषणैः सर्पिर्वृश्चिकालीयुतैः घृतम्।
लिहानो माक्षया रोगैर्मुच्यते मृत्तिकोद्भवैः।

पाण्डुरोगचिकित्सामाह—

पाण्डुरोगी घृतं सर्पिर्वैराभृङ्गरसेन वा। (२१)

---

(१९) कणा पिप्पली, घृतगीते दुग्धे तस्याष्टमांशं मधुशर्करं दत्त्वा पश्चात् पेयम्।

(२०) पाठा प्राकनादि। वेल्लं विड़ङ्गं हरिद्रानीति हरिद्रा दारुहरिद्राच। त्रुषणं त्रिकटु। वृश्चिकाली। 'बिछाती' इति लोके पाठादीनां वृश्चिकान्तानां क्वाथः।

(२१) वरा त्रिफला तस्याः कल्कः घृतपादिकः, भृङ्गराज-स्वरसः घृतसमः। पाकः कार्य्यः।

अहितुण्डकायाश्चिकित्सामाह—

सोमग्रहणे विधिवत् केकिशिखामूल मुद्धृतं वहम् । (क)
जघनेऽथ कन्धरायां क्षपयत्यहितुण्डकां नियतम् ।
सप्तदलपुष्पमरिचं पिष्टं गोरोचनासहितम् ।
पीतं तद्वत्—।

अनामकस्य चिकित्सामाह—

तैलाक्तशिरस्तालुनि सप्तदलार्कस्नुहीभवं क्षीरम् । (ख)
दत्त्वा रजनीचूर्णं दत्ते नश्येदनामकाख्यः ।
तैलस्य भागमेकं मूत्रस्य द्वौ च निम्बदलरसस्य ।
गव्यं पयश्चतुर्गुणमेवं दत्त्वा पचेत्तैलं ।

(क) सोमग्रहणे सूर्यग्रहणकाले, विधिवदुद्धृतमिति शुचिना औषदुद्धरणमन्त्रोच्चारणपूर्वक सूत्रपाटितमित्यर्थः । केकिशिखामूलं अपामार्गमूलं । जघने कट्यां, कन्धरायां ग्रीवायां । सप्तदल 'छातिम' इति भाषानाम अस्य पद्मं, मरिचं, गोरोचनाचेति सर्वं । पिष्टं जलेनेति शेषः । तद्वदिति अहितुण्डकां शमयतीत्यर्थः ।

(ख) तैलाक्तशिरसः कुमारस्य तालुनि ब्रह्मरन्ध्रे सप्तदलस्य सप्तपर्णस्य दुग्धं समं मिलित्वा तेन स्थूलतिलकाकारं कृत्वा तदुपरि च हरिद्राचूर्णं देयम् योगान्तरमाह तैलस्येति । गोमूत्रस्य निम्बपत्ररसस्य च पृथक् द्वौ भागौ । गव्यं दुग्धं चतुर्गुणं तैलस्य । योगान्तरमाह लेपयेच्चेति । स्फुटकं ज्योतिष्मती मलटाङ्गुन इति हिन्दिभाषानाम तस्य पत्रं तद्रसेन गात्रमर्द्दनं । कज्जलमाह आर्कमिति अर्कस्य तूलकं, आविकरोमाणि मेषलोमानि केशराजरसमिश्रैः शुष्कै वर्त्तैर्वेष्टयित्वा तिलतैलाक्तां ज्वालयेत् । तच्छिखोपरि कांस्य-पात्रं धृत्वा पतितकज्जलेन चक्षुषोरञ्जनं कार्य्यम् ।

तेनाभ्यङ्गः सततं रोगमनामकाख्य मपहरति ।
लेहयेच्च शुना वालं नवनीतेन लेपितम् ।
स्फुटकपत्रजरसेनोद्वर्त्तनञ्च तद्वितम् ।
आर्कं तूलकमाविकरोमान्यादाय केशराजस्य
स्वरसेनार्द्रे वस्त्रे कृत्वा वर्त्तिञ्च तैलाक्तम्
तज्जातकज्जललाञ्छितलोचनयुगलोऽप्यलङ्कृतोबालः ।
कष्टमनामकरोगं क्षपयति भूतादिकञ्चापि ।

क्षयस्य चिकित्सामाह—

शिशुः शोषं शरीरस्य समितच्छागदुग्धभुक् । (ग)
यष्ट्याह्वपिप्पली-रोध्र-पद्मकोत्पलचन्दनैः ।
तालीशसारिवाभ्याञ्च साधितं शोथजिद् घृतम् ।
शृङ्गीमधूलिकाभार्गी पिप्पलीदेवदारुभिः ।
अश्वगन्धाद्विकाकोलीरास्नार्षभकजीवकैः ।

(ग) शर्करासहितं छागदुग्धं पीत्वा कुमारस्य पोषणं भवति । योगान्तरमाह यष्ट्याह्वेति । सारिवाभ्यामिति अनन्तमूल-श्यामालताभ्यां । एतेषां घृतचतुर्थभागैः कल्कैः पक्वं घृतम् पुष्टिकरं शिशोः । घृतान्तरमाह शृङ्गीति । मधूलिका मूर्व्वा । जीवकाभावे गुडूची, ऋषभकाभावे भूमिकूष्माण्डः । स्थूलपर्णी क्षुद्रपर्णी माषपर्णी च । एतेषां कल्कैः; शशकस्य मस्तकं त्वङ्निर्म्मुक्तं खण्डशःकृतं जलेनाष्टगुणेन क्वथितं पादावशिष्टं कार्य्यं तेन क्वाथेन च घृतं पक्वं परं पुष्टिकृत् । अपरमाह पादेति । पाद इति घृतचतुर्थभागः । दशगुण इति दुग्धं घृताद्दशगुणम् ।

सूर्पपर्णीविड़ङ्गैश्च कल्कितैः साधितं घृतम् ।
शशोत्तमाङ्गनिर्यूहे शुष्यतः पुष्टिकृत् परम् ।
पादकल्केऽश्वगन्धायाः क्षीरे दशगुणे पचेत् ।
घृतं पेयं कुमाराणां पुष्टिकृद्बलवर्द्धनम् ।
शिवा तामलकी मूर्व्वा शतपुष्पा निशाद्वयम् । (घ)
आत्मगुप्ता वला विल्वं देवपुष्पं शतावरी ।
सुरा मधुरिका मांसी विदारी विश्वभेषजम् ।
अनन्तामलकी श्यामा भार्गी कारिकणा कणा ।
चातुर्जातं चतुर्बीजं चन्दनं रक्तचन्दनम् ।
मुषलीवाजिगन्धा च बीजं गोक्षुरसम्भवम् ।
सर्व्वाण्येतानि तुल्यानि द्राक्षा सर्व्वसमा मता ।
सिता द्राक्षासमा चैवेत्येतानि मधुना सह ।
संमर्द्य मोदकान् कृत्वा माषक-प्रमितान् भिषक्

(घ) शिवा हरितकी, तामलकी भूम्यामलकी, मूर्व्वा सूचीमुखी, निशाद्वयमिति हरिद्रा दारुहरिद्रा च । आत्मगुप्ता वानरीबीजं, देवपुष्पं लवङ्गं, सुरा सुरामांसी, मधुरिका मौरीति प्रसिद्धा, मांसी जटामांसी, विश्वभेषजम् शुण्ठी, अनन्ता अनन्तमूलं । श्यामा श्यामालता, वारिकणा जलपिप्पली, चातुर्जातं यथा—दारुचिनि, स्थूलैला, तेजपत्रं नागकेशरञ्च । चतुर्बीजं यथा—मेथिका, हालिम्, कृष्णजीरा यमानिका च । मूषली तालमूलीति लोके । बीजं गोक्षुरसम्भवमिति गोक्षुरस्य बीजं नतु क्षुपः, अन्यत् स्पष्टम् ।

एकैकमेषां पयसा प्रातः प्रातः प्रयोजयेत्।
परं बङ्गि-करं मेध्यं पुष्टिकृद् बलवर्द्धनम्।

अष्टमङ्गलघृतम्।

वचाकुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च। (ङ)
शारिबा सैन्धवञ्चैव पिप्पली घृतमष्टकम्।
मेध्यं घृतमिदं सिद्धं पातव्यञ्च दिने दिने।
दृढ़स्मृतिः क्षिप्रमेधाः कुमारो बुद्धिमान् भवेत्।

लाक्षादितैलम्।

लाक्षारससमं सिद्धं तैलं मस्तु चतुर्गुणम्। (च)
रास्नाचन्दन-कुष्ठाब्दवाजिगन्धा-निशायुगैः।
शताह्वदारुयष्ट्याह्वमूर्व्वातिक्ताहरेणुभिः।
बालानां ज्वररक्तोघ्न मभ्यङ्गाद् बलवर्णकृत्।

(ङ) ब्राह्मी बिर्मि इति लोके। सिद्धार्थकः श्वेतसर्षपः। वचादिनां पिप्पल्यन्तानां कल्कः। घृतचतुर्गुणेन जलेन पाकः।

(च) वस्त्रेण स्रुथवद्वां लाक्षां गटहीत्वा दोलायन्त्रेण पाच्यम्। लाक्षारस स्तैलसमः। शताह्वः शलुफा इति लोके। तिक्ता कटकी, हरेणुः पर्पटकः। आदौ कल्कपाकः ततो लाक्षारसेन तदनु मस्तुना पाकः कार्य्यः। अनन्तरं शेषपाकः।

कुमारकल्याण-घृतम्।

शङ्खपुष्पी वचा ब्रह्मी कुष्ठं त्रिफलया सह। (क)
द्राक्षासशर्करा शुण्ठी जीवन्ती जीवकं बला।
शटी दुरालभा विल्वं दाड़िमं सुरसा स्थिरा
मुस्तं पुष्करमूलञ्च सूक्ष्मैलागजपिप्पली
एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्।
कषाये कण्टकार्य्याश्च क्षीरे तस्मिंश्चतुर्गुणे
एतत् कुमारकल्याणं घृतरत्नं सुखप्रदम्।

इति बालामयप्रतिषेधोनाम षष्ठोऽध्यायः।

बालग्रहप्रतिषेधोनाम सप्तमोऽध्यायः।

स्कन्दग्रहजुष्टस्य चिकित्सामाह—

स्कन्दग्रहोपसृष्टानां कुमाराणां च शस्यते।
वातघ्नद्रुमपत्राणां निःक्वाथः परिषेचने।
तेषां मूलेषु सिद्धञ्च तैलमभ्यञ्जने हितम्।
देवदारुणि रास्नायां मधुरेषु द्रुमेषु च।

(क) शङ्खपुष्पी तन्त्रान्तरे प्रसिद्धा नतु डानकुनीति लोकप्रसिद्धा। दाड़िमस्य फलं, सुरसा तुलसी, स्थिरा शालपर्णी, पुष्करमूलाभावे कुष्ठं, जीवकाभावे गुड़ूची। कण्टकारी क्वाथे घृताच्चतुर्गुणे गोदुग्धे च पाच्यं। अत्र दुग्धे चतुर्गुणं जलं दत्त्वा पाकः कार्य्यः क्षीरमस्वारणात्तानां जलं विना पाकोपदेशाभावात्। एवं सर्व्वत्र।

सिद्धं सर्पिश्च सक्षीरं पानमस्मै प्रयोजयेत् ॥
सर्षपाः सर्पनिर्मोको वचा काकादनी घृतम् ।
उष्ट्राजाविगवाश्चैव रोमाण्युद्भूपनं शिशोः ।
सोमवल्ली मिन्द्रवल्लीं शमीं विल्वस्य कण्टकान् ।
मृगादन्याश्च मूलानि ग्रथितान्येव धारयेत् ।

स्कन्दापस्मारजुष्टस्य चिकित्सामाह—

विल्वः शिरीषो गोलोमी सुरसादिश्च योगणः
परिषेके प्रयोक्तव्यः स्कन्धापस्मारशान्तये ।
सर्व्वगन्धविपक्वन्तु तैलमभ्यञ्जने हितम् ।
क्षीरवृक्षकषाये च काकोल्यादौ गणे तथा
विपक्तव्यं घृतम्बापि पानीयं पयसान्वितम् ।
उत्सादनं वचाहिङ्गुयुक्तं स्कन्दग्रहे हितम् ।
गृध्रोलूकपुरीषाणि केशा हस्तिनखा घृतम् ।
वृषभस्य च रोमाणि योज्यान्युद्भूपनेऽपिच ।
अनन्तां कुक्कुटीं विम्बीं मर्कटीञ्चापि धारयेत् ॥

शकुनी-प्रतिषेधमाह—

शकुन्यभिपरीतस्य कार्य्यो वैद्येन जानता ।
वेतसाम्रकपित्थानां निःक्वाथः परिषेचने ।
कषायमधुरैस्तैलं कार्य्यमभ्यञ्जने शिशोः ।
मधुकोशीरहृद्वीरसारिवोत्पलपद्मकैः ।

रोध्रप्रियङ्गुमञ्जिष्टा गैरिकैः प्रदिहेच्छिशुं
व्रणेषूक्तानि चूर्णानि पथ्यानि विविधानि च।
स्कन्दग्रहे धूपनानि तानीहापि प्रयोजयेत्।
शतावरी-मृगैर्व्वारुनागदन्तीनिदिग्धिकाः।
लक्षणां सहदेवाञ्च बृहतीञ्चापि धारयेत्।
तिलतण्डुलकं माल्यं हरितालं मनःशिला
बलिरेष करञ्जेषु निवेद्यो नियतात्मना।
स्कन्दग्रहोपशमनं घृतं तच्चेह पूजितम्।

रेवतीप्रतिषेधमाह—

अश्वगन्धाजशृङ्गी च सारिवा सपुनर्नवा
सहे विदारी च तथा कषायाः सेचने हिताः
तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसेऽपिवा
धवाश्वकर्णककुभधातकी-तिन्दुकीषु च
काकोल्यादिगणे चैव पानीयं सर्पिरिष्यते।
कुलत्थाः शृङ्गचूर्णञ्च प्रदेहाः सर्ब्वगन्धिकाः
गृध्रोलूकपुरीषाणि यवा यवफलो घृतम्।
सन्ध्ययो रुभयोः कार्य्यमेतदुद्धूपनं शिशोः।
वरुणारिष्टकमयं रुचकं सेन्दुकं तथा।
सततं धारयेच्चापि कृतं वा पौत्रजीविकम्।
शुक्लाः सुमनसो लाजाः पयः शाल्योदनं तथा।

वलि निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ।
सङ्गमे च भिषक् स्नानं कुर्य्याद्वाचीकुमारयोः ।

पूतनाप्रतिषेधमाह—

कपोतवङ्काऽरलुको वरुणः पारिभद्रकः
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ।
वचा वयस्था गोलोमी हरितालं मनःशिला
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते ।
हितं घृतं तुगाक्षीर्य्या सिद्धं मधुरकेषु च ।
कुष्ठतालीशखदिरं चन्दन-स्यन्दने तथा ।
देवदारुवचाहिङ्गुकुष्ठं गिरिकदम्बकः ।
एला हरेणवस्वापि योज्या उद्वर्तने सदा ।
गन्धनाकुलिकुम्भीकामज्जानो वदरस्य च ।
कर्कटास्थि घृतञ्चैव धूपनं सर्षपैः सह ।
काकादनीं चित्रफलां विम्बीं गुञ्जाञ्च धारयेत् ।

अन्धपूतनाप्रतिषेधमाह—

तिक्तद्रुमकषायाणां कार्य्यः क्वाथोऽवसेचने
सुरासौवीरकं कुष्ठं हरितालं मनःशिला
तथा सर्ज्जरसेचैव तैलार्थमुपदिश्यते ।
पिप्पल्यः पिप्पलीमूलं वर्गोमधुरको मधु
शालपर्णी बृहत्यौ च घृतार्थं मुपदिश्यते ।
सर्व्वगन्धैः प्रदेहश्च गात्रेष्वक्ष्णोश्च शीतलैः ।

पुरीषं कौक्कुटं केशांश्चर्म्म सर्पत्वचस्तथा ।
जीर्णाञ्च भिक्षुसङ्घाटीं धूपनायोपयोजयेत् ॥
कुक्कुटीं मर्कटीं शिम्बी मनस्ताञ्चापि धारयेत् ।

शीतपूतना-प्रतिषेधमाह—

कपित्थं सुवहां विम्बीं तथाविल्वं प्रचीवलम् ।
नन्दीं भल्लातकीञ्चापि परिषेके प्रयोजयेत् ।
वस्तमूत्रं गवां मूत्रं मुस्तञ्च सुरदारु च ।
कुष्ठञ्च सर्व्वगन्धाञ्च तैलार्थमवचारयेत् ।
रोहिणीसर्ज्जखदिर-पलाशककुभत्वचः ।
निःक्काथ्य तस्मिन्निःक्काथे सक्षीरं पाचितं घृतम् ।
गृध्रोलूक-पुरीषाणि वस्तगन्धामहेस्त्वचः ।
निम्बपत्राणि मधुकं धूपनार्थे प्रयोजयेत् ।
धारयेदपिलम्बाञ्च गुञ्जां काकादनीन्तथा ।

सुखभण्डिका-प्रतिषेधमाह—

कपित्थविल्वतर्कारीवांशीगन्धर्व्वहस्तकाः ।
कुवेराक्षी च योज्या स्यु र्वालानां परिषेचने ।
स्वरसैर्भृङ्गवृक्षाणां तथाजहरिगन्धयोः
तैलं वसाञ्च संयोज्य पचेदभ्यञ्जने शिशोः
वचासर्ज्जरसः कुष्ठं सर्पिश्चोड्पने हितम् ।
धारयेदपि जिह्वाञ्च चाषचीरल्लिसर्पजाः ।
वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा ।

नैगमेष-प्रतिषेधमाह—

बिल्वाग्निमन्थपूतिकाः कार्य्याः स्युः परिषेचने ।
प्रियङ्गुसरलानन्ता-शतपुष्पाकुटन्नटैः
पचेत्तैलं सगोमूत्रैर्दधिमस्त्वम्लकाञ्जिकैः
पञ्चमूलद्वयक्वाथे क्षीरे मधुरकेषु च ।
पचेद्घृतञ्च मेधावी खर्जूरी मस्तकेऽपि च
वचां वयस्थां गोलामीं जटिलां वापि धारयेत् ।
उत्सादनं हितञ्चात्र स्कन्दापस्मारनाशनम्
सिद्धार्थकवचाहिङ्गु कुष्ठञ्चैवाक्षतैः सह
भल्लातकाजमोदाभ्रहितमुङ्गुपनं शिशोः
अधस्ताद् वटवृक्षस्य स्नपनञ्चोपदिश्यते ।
मर्कटीलूकगृध्राणां पुरीषाणि नवग्रहे ।
धूपः सुप्तजने कार्य्यो बालस्य हितमिच्छता ।

ग्रहप्रतिषेधमाह—

गवाक्षीव्रह्मदण्डीवृहतीद्वयसारिवाह्रीवेर कुष्ठभूमिकदम्ब-सुरसमञ्जरीकरवीरपुष्पैः प्रदेहः ।

खमहिषपुरीषबिल्वैरण्डनक्तमालाकलूकपचक्वाथः परिषेकः ।

वयस्थाशतावरीसारिवापयस्यैरण्डत्रिकटुकक्षीरसिद्धं तैलमभ्यङ्गस्तथैव च घृतम् पानम् ।

पित्तपक्ष प्रतिषेधमाह—

वचावयस्थाजीवन्तीवासकप्रियङ्गुगुग्गुलुरास्नामनःशिलैः प्रदेहः तैरेवच सिद्धं तैलमभ्यङ्गः ।

विल्वकपित्थकरञ्जतर्कारीसुरसपाटलीवरुण-पारिभद्रक-मातुलुङ्गपत्रक्काथेन रात्रौ परिषेकः । तैरेव च तैलं सुरावस्तमूत्रयुक्तं साधितमभ्यङ्गः ।

त्रिफलांशुमतीहयपयस्यामधुककल्केन-दशमूलनिर्यूहे सक्षीरं सर्पिः पक्वं पानम् ।

शुष्करेवती-प्रतिषेधमाह—

वचाश्वगन्धाहिङ्गुलाजसिद्धार्थकैरुद्वर्त्तनम् । सर्षपतैलं वचासिद्धं नेत्रपूरणम् ।

इति बालग्रहप्रतिषेधोनाम सप्तमोऽध्यायः ।

मातृकाप्रतिषेधोनामाष्टमोऽध्यायः ।

तत्र नन्दायाः प्रतिषेधमाह—

चतुष्पथे बलिर्देयः । अश्वत्थपत्रं कुम्भे निक्षिप्य शान्त्युदकेन स्नापयेत् । रसोनसिद्धार्थकमेषशृङ्ग-निम्बपत्रशिव निर्माल्यैर्बालकं धूपयेत् ।

सुनन्दायाः प्रतिषेधमाह—

बलिर्देयः, शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्य-सिद्धार्थमार्ज्जारलोमोशीरवालघृतैर्धूपं दद्यात् ।

पूतनायाः प्रतिषेधमाह—

बलिं दत्त्वा शिवनिर्म्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गै-र्दिनत्रयं धूपयेत् ।

कण्टपूतनायाः प्रतिषेधमाह—

बलिं दत्त्वा शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्य-सर्षपनिर्मोकगुग्गुलुनिम्बपत्रवालकघृतैर्धूपं दद्यात् ।

शकुनिकायाः प्रतिषेधमाह—

बलिं दत्त्वा शान्त्युदकेन स्नापयेत् शिवनिर्म्माल्यरसोन-गुग्गुलुसर्षपनिर्मोकनिम्बपत्रघृतैधूपं दद्यात् ।

शुष्करेवत्याः प्रतिषेधमाह ।

बलिं दत्त्वा शान्त्युदकेन स्नानं । गुग्गुलुमेषशृङ्गीसर्ष-पोशीरवालकघृतै र्धूपयेत् ।

सूतिकायाः प्रतिषेधमाह—

बलिं दत्त्वा शान्त्युदकेन स्नानं । गुग्गुलुनिम्बपत्र-गोशृङ्गश्वेतसर्षपघृतैर्धूपं दद्यात् ।

निर्ऋतायाः प्रतिषेधमाह—

बलिं दत्त्वा काकविष्ठागोमांसगोशृङ्गरसोनमार्ज्जार-लोमनिम्बपत्रघृतैर्धूपयेत् ।

पिलिपिच्छिकायाः प्रतिषेधमाह —

वलिं दत्त्वा शान्त्युदकेन स्नानं। शिवनिम्बाख्यगुग्गुलु-गोशृङ्गसर्पनिर्मोकघृतै र्धूपयेत्।

कासुकायाः प्रतिषेधमाह—

शान्त्युदकेन स्नानं। शिवनिम्बाख्यगुग्गुलुसर्षपघृतै र्धूपयेत्।

विविधबालामयप्रतिषेधोनाम नवमोऽध्यायः।

बालरसः।

पलं शुद्धस्य सूतस्य गन्धकस्य पलं तथा। (क)
सुवर्णमाक्षिकस्यापि भागार्द्धं संप्रकल्पयेत्।
ततः कज्जलिकां कृत्वा लौहपात्रमये दृढ़े।
केशराजस्य भृङ्गस्य निर्गुण्डाः स्वरसेन च।
शुभे शिलामये पात्रे लौहदण्डेण मर्दयेत्।
राजिकासदृशीश्चैव वटिकां कारयेद्भिषक्।

(क) गन्धकस्यापि शुद्धस्य। सूतगन्धकयोः पलं पलं गृहीत्वादौ कज्जलिका करणीया। सुवर्णमाक्षिकमपि सुजारितं ग्राह्यं। भागार्द्धमिति कज्जलिकाया इति शेषः। केशराजादीनां स्वरसेन वारत्रयं भावयन्ति वृद्धवैद्याः। भृङ्गो भृङ्गराजः, निर्गुण्डी 'निसिन्दा' इति लोके। नागवल्लीदलं ताम्बूलपत्रम्।

एकैकां वटिकां खादेन्नागवल्लीदलद्वयैः । (क)
हन्ति त्रिदोषसम्भूतं ज्वरञ्चैव सुदारुणं ।
चिरज्वरञ्च कासञ्च शूलं सर्व्वभवन्तथा ।
शिशूनां रोगनाशाय शिवेन परिकीर्त्तितः ॥१॥

शङ्खवटी—।

चिञ्चाक्षारपलं पटुव्रजपलं निम्बूरसे कल्कितं । (ख)
तस्मिन् शङ्खपलं प्रतप्तमसकृत् संस्थाप्य शोर्णाविधि ।
हिङ्गुव्योषपलं रसामृतवली निक्षिप्य निष्कांशिकान् ।
वट्टा शङ्खवटी क्षयग्रहणिकारुक्-पक्तिशूलादिषु ॥

(क) गन्धकस्यापि शुद्धस्य । सूतगन्धकयोः पलं गलं गटक्षीत्वादौ कज्जलिका करणीया । सुवर्णमाक्षिकमपि सुजारितं ग्राह्यं । भागार्द्धमिति कज्जलिकाया इति शेषः । केशराजादीनां खरसेन वारत्रयं भावयन्ति शुद्धवैद्याः । भृङ्गो भृङ्गराजः, निर्गुण्डी "निसिन्दा" इति लोके । नागवल्लीदलं ताम्बूलपत्रम ।

(ख) चिञ्चाक्षारमिति स्वयंशुष्कपतितां तिन्तिडीकत्वचं गटक्षीत्वा अन्तर्धूमं दग्ध्वा क्षारोग्राह्यः । पटुव्रजपलं पञ्चलवणं मिलित्वा पलं । निम्बूरसे कल्कितं निम्बूरस-पिष्टं, तस्मिन्निति निम्बूरसे, प्रतप्तं अग्नौ धृत्वा तप्तं शङ्खं शोर्णाविधि यावच्चूर्णीभूयाधः पतति, असकृत् वारंवारं, निम्बूरसे संस्थाप्य तच्चूर्णं पलं ग्राह्यं । व्योषं त्रिकटु, हिङ्गु धृतभर्ज्जितं, हिङ्गुशुण्ठी पिप्पलीमरिचानां मिलित्वा पलं अमृतोमिठाविष इति लोके, वल्ली गन्धकः सोऽपि शुद्धः, रसविषगन्धकानां प्रत्येकं निष्कं माषकचतुष्टयं । सर्व्वचूर्णं मेकीकृत्य निम्बूरसेन रौद्रे तावद् भावयेत् यावदक्लता स्यात् । मात्रा बालपक्षे सुद्गद्वयमिता ।

अथ क्रिमिरोग-चिकित्सा ।

पारसीययमानिका पीता पर्य्युषितवारिणा प्रातः ।
गुड़पुर्व्वा क्रिमिजातं कोष्ठगतं पातयत्याशु । (ग)
घण्टाकर्णस्य पत्रस्य वाहुनेत्रदलस्य वा ।
स्वरसो मधुना पीतः क्रिमीन् सद्यो विनाशयेत् ॥ (घ)
जलपीता सोमराजी क्रिमीन् सर्व्वान् व्यपोहति ॥
क्वाथो दाड़िममूलस्य कीटाणून् नाशयेद्ध्रुवम् ॥
विड़ङ्गसैन्धवक्षार-कम्पिल्लक-हरीतकीः । (ङ)
पिवेत् तक्रेण संपिष्य सर्व्वे क्रिमिनिवृत्तये ॥
पलाशवीजेन्द्रविड़ङ्गनिम्बभूनिम्बचूर्णं सगुड़ं पिवेद् यः ।(च)
दिनत्रयेण क्रिमयः पतन्ति पलाशवीजेन यमानिकां वा ॥

(ग) अस्ति पारसीक-यमान्या भक्षकारितागुणोऽतो सावधानं मात्रा कल्पनीया । गुड़पूर्व्वा भेषजपानात्पूर्व्वं भिक्षुगुड़ं भक्षयित्वा ।

(घ) घण्टाकर्ण 'घेटकुल' इति लोके । बहुनेत्रः 'आनारस' इति लोके । तस्य दलः दलाधोभागः शुभ्रवर्णः ।

(ङ) क्षारो यवक्षारः, कम्पिल्लकः 'कमलागुड़ि' इति लोके ।

(च) इन्द्रः इन्द्रयवः, भूनिम्बः 'चिरता' इति लोके । पलाशबीजेनेति हितोवो योगः ।

पारसीकादिचूर्णम् ।

पारसीययमानिका-घनकणा शृङ्गीविड़ङ्गारुणा (छ)
चूर्णं श्लक्ष्णतरं विलोढ़मपि तत् क्षौद्रेण संयोजितम् ।
कासं नाशयति ज्वरञ्च जयति प्रौढ़ातिसारं जये-
च्छर्दिं मर्दयति क्रिमिन्तु नियतं कोष्ठस्थमुन्मूलयेत् ॥

नवायसलौहम् ।

त्रुषणत्रिकलामुस्त विड़ङ्ग-चित्रकाः समाः । (ज)
नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा ।
भक्षयेत् पाण्डुहृद्रोग कुष्ठार्शःकामलापहम् ।

कर्णशूलचिकित्सा ।

अर्कस्य पत्रं परिणाम-पीतम् (झ)
आज्येन लिप्तं शिखिनावतप्तम् ।
आपीड्य तोयं श्रवणे निषिक्तं
निहन्ति शूलं बहुवेदनञ्च ।

(छ) घनं सुस्तकं, कणा पिप्पली, शृङ्गी कर्कटशृङ्गी. अरुणा 'आतदरुष' इति लोके। क्रिमिलक्षणेषु ज्वरादिषु एतत् योज्यम् ।

(ज) अयोरजः शतपुटितं देयं। शिखिनः कुज्वरे यकृद्विदाल्यौ वृद्धाः कालमेघरसेन सार्द्धं योजयन्ति।

(झ) परिणामपीतं पक्वमित्यर्थः। शिखिना अग्निना। तोयं रसं, श्रवणे कर्णे, निषिक्तं एकद्विबिन्दुमितं ।

आम्रजम्बू-प्रवालानि मधुकस्य वटस्य च । (ञ)
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥
जातीपत्ररसैस्तैलं विपक्वं पूतिकर्णजित् । (ट)
शतावरीवाजिगन्धा-पयस्यैरण्डबीजकैः । (ठ)
तैलं विपक्वं सक्षीरं पालीनां पुष्टिकृत्परम् ॥
कर्णस्य दुर्व्यधे भूते संरम्भो वेदना भवेत् । (ड)
तत्र दुर्व्यधरोहार्थं लेपो मध्व्याज्यसंयुतैः ।
मधुकयवमञ्जिष्ठा-रुवुमूलैः समन्ततः ॥

अपामार्गक्षार-तैलम् ।

मार्गक्षारजलेन च तत्कृतकल्केन साधितं तैलम् । (ढ)
अपहरति कर्णनादं बाधिर्यञ्चापि पूरणतः ।

(ञ) प्रवालानि पत्राणि । मधुकस्य मौया इति प्रसिद्धस्य । आम्रादीनां पत्राणां क्वाथकल्काभ्यां तैलं पाच्यम् ।

(ट) जाती 'चामेली' इति लोके तस्य पत्ररसेन पक्वं ।

(ठ) वाजीगन्धा अश्वगन्धा अस्या मूलं, पयसी क्षीरकाकोली, एतेषां कल्कैः, क्षीर तैलसमं, पालीनां कर्णपालीनां ।

(ड) कर्णे दुर्विद्धे, संरम्भः वेदनापाकौ, मधुकः मधुयष्टिः, रुवुः एरण्डः

(ढ) मार्गः अपामार्गः । तस्यान्तर्धूमदग्धं क्षारं गृहीत्वा क्षारादष्ट-गुणं जलं दत्त्वा चतुर्थावशिष्टे स्रावयित्वा तज्जलं ग्राह्यम् । क्षारजलं तैलाद्विगुणं चतुर्गुणं वा देयम् ।

शम्बूक-तैलम् ।

शम्बूकस्य च मांसेन कटुतैलं विपाचितं । (ण)
तस्य-पूरणमात्रेण कर्णनाड़ी प्रशाम्यति ॥

कुष्ठाद्यं तैलम् ।

कुष्ठहिङ्गुबचादारुशताह्वाबिल्वसैन्धवैः ।
पूतिकर्णापहं तैलं बस्तमूत्रेण साधितम् ॥ (त)

नासारोगाधिकार ।

शिग्रु-तैलम् ।

शिग्रु सिंह्लीनि कुम्भीणां बीजैः सव्योषसैन्धवैः । (थ)
विल्वपत्ररसैः सिद्धं तैलं स्यात् पूतिनस्यनुत् ॥
सर्षिषा-भृष्टया-धात्र्या शिरसो लेपतः क्षणात् ।
नासायाः संप्रवृत्तञ्च रुधिरञ्च विनश्यति ॥
पुटपक्वं जाया पत्रं सिन्धुतैलसमायुतम् । (द)
प्रतिश्यायेषु सर्व्वेषु शीलितं परमौषधम् ॥

(ण) शम्बूकमांसं तैलचतुर्थांशं ग्राह्यम् ।

(त) बिल्वं गुण्ठो, बस्तमूत्रं छागमूत्रम् । तच्च तैलाच्चतुर्गुणं देयम् । कुष्ठादीनां चूर्णं तैलपादिकं ग्राह्यम् ।

(थ) शिग्रुः शोभाञ्जनः "सजिना" इति लोके । सिंह्ली दहती, निकुम्भी दन्ती, एतेषां बीजं मिलित्वा तैलपादिकं । बिल्वपत्ररसः श्लेष्मघ्नः ।

(द) जया 'जयन्ती' इति लोके । सिन्धु सैन्धवलवणं । तैलं सार्षपं, शीलितं भुक्तं ।

शोषणं गुड़संयुक्तं स्निग्धदध्यन्नभोजनम्। (ध)
नवप्रतिश्यायहरं विशेषात् कफपाचनम्॥
प्रतिश्याये नवे श्रस्तो यूषश्चिञ्चादलोद्भवः। (न)
ततः पक्वं कफं ज्ञात्वा हरेच्छीर्षविरेचनैः।
भक्षयति भुक्तमात्रे सलवणं सुस्निग्धमाषमतुग्रणम्। (प)
स जयति सर्व्वसमुत्थं चिरजातञ्च प्रतिश्यायम्॥

शिखरि-तैलम्।

गृहधूमकणादारु-चारनक्ताह्व-सैन्धवैः।
सिद्धं शिखरीबीजैश्च तैलं नासार्शसां हितम्। (फ)

दन्तोद्भेदगदान्तकः।

पिप्पली-पिप्पली-मूल-चव्याचित्रकनागरैः।
अजमोदा यमानीभ्यां निशया मधुकेन च॥
दारुदार्व्वी-बिड़ङ्गैला-नागकेशरनीरदैः।
शटीशृङ्गी बिड़ैर्व्वीन्ना शङ्खायोहेममाक्षिकैः॥

(ध) उषणं मरिचतं, गुड़मिलगुड़ः; स्निग्धं अनुद्धृतस्नेहं अम्लं अम्लरसं।

(न) चिञ्चादलं तिण्डिड़ीपत्रं।

(प) लवणं सैन्धवं, सुस्निग्धं सुसिद्धं।

(फ) नक्ताह्वः करञ्जस्य वीजं ग्राह्यम्। शिखरीबीज मपामार्ग-तण्डुलं।

विधाय पयसा पिष्टैर्वटिका वल्लसम्मिता ।
दन्तघर्षेऽभ्यवहृतौ योजयेच्च प्रयोगवित् ॥
प्रयोगादस्य दन्तानां क्वरयोद्गमतो गदाः ।
ज्वराक्षेपातिसाराद्या निवर्त्तन्ते न संशयः ॥

इति कुमारतन्त्रम् सम्पूर्णम् ।